BENARES SANSKRIT SERIES;
A
COLLECTION OF SANSKRIT WORKS:
EDITED BY THE
PANDITS OF THE BENARES SANSKRIT COLLEGE,
UNDER THE SUPERINTENDENCE OF
R. T. H. GRIFFITH, M. A., C. I. E.
AND
G. THIBAUT, Ph. D.
No. 80.

श्री १०८ भगवद्रामानुजाचार्यविनिर्मितो

वेदान्तदीपः ।

बादरायणसूत्राणां संग्रहव्याख्यारूपः ।

श्रीमदाचार्यभट्टनाथस्वामिना संशोधितः ।

VEDÂNTADEEPA,

A Gloss on Brahmasutras,

By

ŚREE BHAGAVAT RÂMÂNUJÂCHÂRYA.

EDITED BY

Śree Âchârya Bhattanâthaswâmy.

FASCICULUS III.

BENARES.
Published by the Proprietors *Messrs. Braj B. Das & Co.,*
AND SOLD BY H. D. GUPTA,
Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidya vilas Press,
Beenars.

1904.

स्वशेषिभूतक्रतुद्वारेण यत्फलं तदेवैषां स्वशेषिभूतविद्यामयक्रतुद्वारेण फलमिति निश्चीयत इति विद्यामयक्रत्वङ्गभूता एव मनश्चितादयः ॥ सूत्रार्थः—मनश्चितादिः क्रिया स्यात् क्रियामयक्रत्वङ्गभूत इत्यर्थः । कुतः । प्रकरणात् । पूर्वप्रकृतेनेष्टकचितेनाऽव्यभिचरितक्रतुसम्बन्धिनोपस्थितक्रतुगृहीतत्वेन तदङ्गभूतः । एषाश्चाग्नित्वात्तेनेष्टकचितेन विकल्पः । विद्यारूपाणामप्येषां क्रियामयक्रत्वङ्गभावो न विरुध्यते द्वादशाहांगभूतमानसग्रहवत् ॥

अतिदेशाच्च ॥ ४५ ॥

"तेषामेकैक एव तावान् यावानसौ पूर्वः" इति तेषु पूर्वेष्टकचितकार्यातिदेशाच्च तेनैषां विकल्पः प्रतीयते । तेन विकल्पो हि तच्छेषिभूतक्रत्वङ्गत्वेन विनैषां नोपपद्यते । अतश्च तदङ्गभूताः ॥

विद्यैव तु निर्धारणाद्दर्शनाच्च ॥ ४६ ॥

तुशब्दः पक्षं व्यावर्तयति । मनश्चितादिर्विद्यैव विद्यामयक्रत्वङ्गभूत एवेत्यर्थः । कुतः । निर्धारणात् । तेषां विद्यारूपत्वे सिद्धेऽपि "ते हैते विद्याचित एव" इति निर्धारणं विद्यामयक्रत्वङ्गतयैषां विद्यामयत्वख्यापनार्थम् । अत्रैव विद्यामयक्रतुदर्शनाच्च तदङ्गत्वमेवैषाम् । दृश्यते च विद्यामयक्रतुः "मनसैव ग्रहा गृह्यन्ते मनसा स्तुवन्ति मनसा शंसन्ति" इत्यादौ ॥

अत्र विद्यामयक्रतौ विधिपदाश्रवणात् तत्फलसम्बन्धाप्रतीतेश्च प्रकरणेनेष्टकाचिताग्न्युपस्थापितक्रत्वङ्गताप्रतीतेश्च विद्यामयक्रत्वङ्गता बाध्यते इत्याशङ्क्याह—

श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥ ४७ ॥

श्रुत्यादेः प्रकरणाद्बलीयस्त्वेन श्रुत्याद्यवगतस्य विद्यामयक्रत्वन्वयस्य प्रकरणेन न बाधः । श्रुतिस्तावत् "ते हैते विद्याचित एव" इति । तां विवृणोति "विद्यया हैवैत एवं विदश्चिता भवन्ति" इति । लिङ्गवाक्ये च भाष्ये दर्शिते । एवं विदो मनश्चक्षुरादिव्यापारेषु अग्नित्वं सम्पादयितुः एते मनश्चितादयो विद्यया प्रधानभूतया चिता भवन्तीत्यर्थः ॥

"मनसैव ग्रहा गृह्यन्ते" इत्यादौ विधिपदाश्रवणाद्विद्यामयक्रतुविधिर्न संभवति, तदसंभवादेव तदन्वयोऽपि न संभवतीत्याशङ्क्याह—

अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम् ॥ ४८ ॥

ग्रहस्तोत्रशस्त्रेभ्यो यज्ञानुबन्धेभ्य इष्टकाचितान्वयिनः क्रतोरत्र विधीयमानविद्यामयक्रतुपृथक्त्वमवगम्यते । प्रज्ञान्तरपृथक्त्ववत् यथा प्रज्ञान्तराणां दहरादिविद्यादीनां पृथक्त्वहेतुभ्यः पृथक्त्वम् । आदिशब्दात्पूर्वोक्तश्रुत्यादि गृह्यते । श्रुत्यादिनाऽनुबन्धैश्च विद्यामयक्रतुविधिः परिकल्प्यत इत्यर्थः । दृष्टश्चानुवादसरूपेऽपि कल्प्यमानो विधिः "यदेव विद्यया करोति" इत्यादौ । तदुक्तं "वचनानि त्वपूर्वत्वात्" इति ।

यत्तूक्तमतिदेशाच्चेष्टकाचितशेषिभूतक्रत्वन्वयो गम्यत इति तत्राह—

न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥ ४९ ॥

नावश्यमतिदेशेनेष्टकचिताग्नितुल्यदेशत्वमप्याश्रयणीयम् ।

येन केन चित्सामान्येनातिदेशोपलब्धेः। "स एष एव मृत्युर्य एष एतस्मिन् मण्डले पुरुषः" इतिवत्फलसामान्येन भविष्यत्यतिदेशः। न हि तत्र मण्डलपुरुषे मृत्युलोकापत्तिरप्यतिदिश्यते। अपि तु मृत्युवत्सर्वहरत्वमेव॥

परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः॥५०॥

परेण च ब्राह्मणेन तस्य मनश्चिताद्यभिधायिनः शब्दस्य ताद्विध्यं तद्विधत्वं विद्यामयप्रतिपादकत्वमवगम्यते। परेण हि ब्राह्मणेन "अयं वाव लोक एषोऽग्निचितस्तस्याप एव" इत्यादिना पृथक्फला विद्यैव विधीयते। अग्निरहस्ये क्रिया एव विधीयन्त इति नास्ति नियम इत्यर्थः। क्रियाप्रकरणे त्वेषां मनश्चितादीनामनुबन्धः सम्पादनीयानामग्न्यङ्गानां भूयस्त्वात् क्रियते। अतो विद्यामयक्रत्वङ्गभूता एव मनश्चितादयोऽग्नयः।

(शरीरेभावाधिकरणम्।)

एक आत्मनः शरीरे भावात् ॥ ५१ ॥

प्रत्यगात्मन आत्मतया परमात्मोपास्यः, उपासकस्यापि स्वरूपमुपास्योपासनस्वरूपवत् ज्ञातव्यमिति ह्युक्तम् "त्रयाणाम्" इत्यादिना। वक्ष्यते च "आत्मेति तूपगच्छन्ति" इति। तत्र किं प्रत्यगात्मनः शरीरे वर्तमानस्य कर्तृत्वभोक्तृत्वादिविशिष्टं रूपमनुसन्धेयमुत प्रजापतिवाक्योदितापहतपाप्मत्वादिगुणकं यथावस्थितरूपमिति संशयः॥ शरीरे वर्तमानस्य यादृशं रूपं तदेवानुसन्धेयमिति पूर्वपक्षः। कर्मविधिष्विवोपासनविधावपि तावतैव साधनानुष्ठानफलानुभवयोः संभवात्। "यथा क्रतुरस्मिल्लोके पुरुषः" इति तु 'तं यथा यथोपा-

सते' इत्यनेनैकार्थ्यात्परमात्मविषयम् ॥ राद्धान्तस्तु—"तत्त्वमसि । स त आत्माऽन्तर्याम्यमृतः" इति प्रत्यगात्मन आत्मतयैव परमात्मोपास्य इति प्रत्यगात्मनः स्वरूपमप्युपासनान्तर्गतम् । "परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते" इति यथावस्थितात्मस्वरूपस्यैव ब्रह्मानुभवः फलमित्यतः "यथा क्रतुरस्मिल्लोके पुरुषः" इति न परमात्ममात्रविषयम्, अपि तु प्रत्यगात्मात्मभूतोपास्यविषयमिति प्रजापतिवाक्योदितं यथावस्थितं स्वरूपमेवानुसन्धेयम् । अन्यथा प्राप्योपास्ययोः प्रकारभेदात् "यथा क्रतुः" इति विरुध्येत । "यजेत स्वर्गकामः" इत्यादिकर्मविधौ तु कर्तृस्वरूपानुसन्धानं न साधनान्तर्गतमिति विशेषः ॥ सूत्रार्थस्तु—कर्तृत्वादिविशिष्टमेवात्मनः स्वरूपमनुसंधेयमित्येके मन्यन्ते । कुतः । शरीरे वर्तमानस्योपासितुरात्मनस्तथाभावात् ॥

व्यतिरेकस्तद्भावभावित्वान्न तूपलब्धिवत् ॥ ५२ ॥

न कर्तृत्वादिविशिष्टमनुसन्धेयम् । अपि तु सांसारिकस्वरूपान्मुक्तस्वरूपस्य यो व्यतिरेकः सोऽनुसन्धेयः । कुतः । तथोपासनभावित्वाद्व्यतिरिक्तस्वरूपप्राप्तेः । "यथा क्रतुरस्मिल्लोके" इति ह्याह । उपलब्धिवत् यथा ब्रह्मस्वरूपोपलब्धिर्यथावस्थितब्रह्मानुसन्धानयुक्तस्यैव तथात्मोपलब्धिरपि ॥

(अङ्गावबद्धाधिकरणम् ।)

अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥ ५३ ॥

"ओमित्येतदक्षरमुद्गीथमुपासीत" इत्युद्गीथादिक्रत्वङ्गाश्रया उपासनाः श्रूयन्ते । ताः किं यासु शाखासु श्रूयन्ते तास्वेव व्यवस्थिता उत सर्वासु शाखासु संबद्धा इति संशयः ॥ शाखासु

स्वरभेदात् प्रतिशाखमुद्गीथभेदात् यत्र श्रूयन्ते तत्रस्थोद्गीथादेः संनिधानात्तेनैवान्विता व्यवस्थिता इति पूर्वः पक्षः ॥ राद्धान्तस्तु—यद्यप्युद्गीथव्यक्तिभेदो विद्यते तथापि तत्र तत्र चोद्गीथजातीयत्वेन संबन्धात् सर्वेषां चोद्गीथजातीयत्वाविशेषात् " उद्गीथमुपासीत " इति श्रुत्यैव सर्वसंबन्ध इति सर्वशाखासु संबध्यन्ते ॥ सूत्रार्थः—न त्वङ्गावबद्धा उपासनास्तासु व्यवस्थिताः, अपि तु प्रतिवेदं सर्वशाखासु संबध्यन्त इत्यर्थः । हीति हेतौ । यस्मादुद्गीथजातीयत्वाविशेषेण सर्वसंबन्धस्तस्मादित्यर्थः ॥

मन्त्रादिवद्वाऽविरोधः ॥ ५४ ॥

वाशब्दश्चार्थे । यथा मन्त्रादीनां क्रत्वङ्गभूतानामेकैकशाखावगतानां सर्वशाखासु क्रतोरेकत्वेन सर्वत्र सम्बन्धो न विरुध्यते तद्वच्चाविरोधः ॥

(भूमज्यायस्त्वाधिकरणम्)

भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति ॥५५॥

वैश्वानरविद्यायां स्वर्लोकादिसवाय्वाकाशपृथिव्यवयवो वैश्वानरात्मोपास्यः श्रुतः । तत्र किं व्यस्तस्यैवोपासनं कार्यमुत व्यस्तस्य समस्तस्य चाथ समस्तस्यैवेति संशयः ॥ "औपमन्यव कं त्वमात्मानमुपास्स इति दिवमेव भगवो राजन्"इत्यादिना स्वर्लोकादिपृथिव्यन्तानां वैश्वानरात्मनो मूर्धादिपादान्तावयवत्वमभिधाय तत्र तत्र व्यस्तस्यैवोपासनं फलं च विहितमिति पश्चात् "यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते"इति पूर्वोक्तस्य समासेनोपसंहार इति युक्तम् । अतो व्यस्तस्यैवोपास

नं कार्यमिति प्रथमः पक्षः ॥ समस्तोपासनस्य "सर्वेषु लोकेषु सर्वेषु भूतेषु सर्वेष्वात्मसु चान्नमत्ति" इति व्यस्तोपासनफलेभ्यः फलान्तरविधानाद्व्यस्तस्य समस्तस्य चोपासनं कार्यमिति द्वितीयः पक्षः ॥ राद्धान्तस्तु—" आत्मनं वैश्वानरं संप्रत्यध्येषितमेव नो ब्रूहि " इत्यारभ्य वैश्वानरात्मनः स्वर्लोकादिपृथिव्यन्तानां मूर्धादिपादान्तावयवत्वमभिधाय " यस्त्वेतमेवं प्रादेशमात्रमभिविमानमात्मानं वैश्वानरमुपास्ते स सर्वेषु लोकेषु" इत्युपसंहारादेकस्यैव वैश्वानरात्मनस्त्रैलोक्यशरीरस्य परस्य ब्रह्मण उपासनं विधाय फलं च "सर्वेष्वात्मसु चान्नमत्ति " इति "तद्यथेषीकतूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्ते" इति च सर्वेषामात्मनामविशेषेण भोग्यभूतं परं ब्रह्मानुभवति तद्विरोधिनश्च सर्वपाप्मनस्तरतीत्युक्तमिति गम्यते । अत एकवाक्यत्वात्समस्तस्यैवोपासनं कार्यम् । व्यस्तवादस्तु स्वर्लोकादीनां मूर्धाद्यवयवत्वज्ञापनार्थः । तत्र तत्र फलवादः " वैश्वनरं द्वादशकपालं निर्वपेत्पुत्रे जाते यदष्टाकपालो भवति"इत्यादिवद्द्रष्टव्यः ॥ सूत्रार्थः—भूम्नो ज्यायस्त्वं समस्तोपासनस्य ज्यैष्ठ्यं प्रामाणिकत्वमित्यर्थः । एकवाक्यत्वावगतेः । व्यस्तवादः क्रतुवद्द्रष्टव्यः । " वैश्वानरं द्वादशकपालं निर्वपेत्—यदष्टाकपालः" इत्यादिक्रताविवेत्यर्थः । तथा हि दर्शयति समस्तोपासनस्य ज्यायस्त्वमेव दर्शयति श्रुतिः "मूर्धा ते व्यपतिष्यद्यन्मां नागमिष्यः" इत्यादिना व्यस्तोपासनेऽनर्थं ब्रुवन्ती ।

(शब्दादिभेदाधिकरणम्)

नाना शब्दादिभेदात् ॥ ५६ ॥

सद्विद्यादहरविद्याशाण्डिल्यविद्याभूमविद्यादिका ब्रह्मो-

पासनरूपा ब्रह्मप्राप्तिफला किमेकविद्या उत नानेति संशयः ॥ उपास्यस्य ब्रह्मणः फलस्य चैकत्वात् वेदोपासीतेति च पर्यायत्वादेकविद्येति पूर्वपक्षः ॥ ब्रह्मैकत्वेऽपि जगदेककारणत्वापहतपाप्मात्वाद्यनुबन्धभेदहेतुभिः पूर्वकाण्डोदितशब्दान्तरादिभिरेवानुबन्धभेदमापन्ना नानाभूता विद्येति राद्धान्तः । शब्दान्तरादिभिस्तत्रतत्रोदितैरेव विद्याभेदसिद्धावपीह पुनर्वचनं ब्रह्मप्राप्तिहेतुभूतं वेदान्तोदितं ज्ञानमविधेयमिति कुदृष्टिनिरासार्थम् ॥ सूत्रार्थः—सद्विद्याभूमविद्यादिका नानाभूताः । ब्रह्मण एकत्वेपि सद्भूमापहतपाप्मेतिशब्दभेदात् । आदिशब्दादभ्याससंख्यागुणधर्मक्रियानामधेयानि गृह्यन्ते ॥

(विकल्पाधिकरणम् ।)

विकल्पोऽविशिष्टफलत्वात् ॥ ५७ ॥

सद्विद्याभूमविद्यादिकानां ब्रह्मप्राप्तिफलानामेकस्मिन्पुरुषे समुच्चयोऽपि संभवति नेति संशयः ॥ अग्निहोत्रदर्शपूर्णमासज्योतिष्टोमादीनां स्वर्गैकफलानां तत्र भूयस्त्वापेक्षया यथैकस्मिन्पुरुषे समुच्चयो दृश्यते तथेहापि ब्रह्मानुभवभूयस्त्वापेक्षयैकस्मिन्पुरुषे समुच्चयः संभवतीति पूर्वः पक्षः ॥ देशतः कालतः स्वरूपतश्चानवच्छिन्नानन्दस्वरूपब्रह्मानुभवः सर्वासां परविद्यानां फलम् । तच्चैकया विद्ययाऽवाप्तमिति एकस्मिन्पुरुषे विद्यान्तरसमुच्चयः प्रयोजनाभावाच्च न संभवतीति सर्वासां विकल्प इति राद्धान्तः ॥ सूत्रमपि व्याख्यातम् ॥

काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥ ५८ ॥

ब्रह्मप्राप्तिव्यतिरिक्तफला विद्याः काम्याः । तास्तु यथेष्टं समुच्चीयेरन् विकल्पेरन्वा । पूर्वहेत्वभावात् फलस्य परिमितत्वात् भूयस्त्वापेक्षया समुच्चयः संभवतीत्यर्थः ॥

(यथाश्रयभावाधिकरणम् ।)

अङ्गेषु यथाश्रयभावः ॥ ५९ ॥

कर्माङ्गाश्रयाणामुद्गीथाद्युपासनानां गोदोहनादिवदधिकारान्तरत्वेनोपादानानियमः पूर्वोक्तः संभवति नेति संशयः ॥ न संभवतीति पूर्वः पक्षः । 'उद्गीथमुपासीत'इत्युपासनविधौ फलान्तराश्रवणादुद्गीथसम्बन्धावगतक्रत्वङ्गभावाविरोधात् । एवं विधिवाक्येनैव क्रत्वङ्गभावेऽवगते सति "यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरम्"इति च वर्तमाननिर्देशो "न स पापं श्लोकं शृणोति"इतिवदर्थवादमात्रं स्यात् ॥ राद्धान्तस्तु—"यदेव विद्यया करोति—तदेव वीर्यवत्तरम्"इति विद्यायाः क्रतुवीर्यवत्तरत्वं प्रति साक्षात्साधनभावोऽवगम्यते । एवं फलसाधनतयाऽवगता विद्या किमाश्रित्य फलं करोतीत्यपेक्षायाम् "ओमित्येतदक्षरमुद्गीथमुपासीत" इत्युद्गीथमाश्रित्य कुर्यादिति क्रत्वङ्गभूतोद्गीथाश्रयत्वमात्रं प्रतीयते । अतः फलान्तरसाधनतयाऽवगतस्य क्रत्वङ्गभावो नोपपद्यत इति गोदोहनादितुल्यतयोपादानानियमः सिध्यत्येव । "यस्य पर्णमयी जुहूर्भवति न स पापं श्लोकं शृणोति"इत्यत्र तु पर्णताया जुहूसम्बन्धात्प्रागपापश्लोकश्रवणं प्रति साक्षात्साधनभावो न श्रूयते । पर्णतासम्बन्धिपुरुषसम्बन्धमात्रं श्रुतम् । तत् "पर्णमयी जुहूः"इति श्रुत्यैव प्रथमावगतं क्रत्वङ्गभावं न विरुणद्धीत्यर्थवादमात्रमिति विशेषः ॥ सूत्रार्थः—अङ्गेषूद्गीथादिष्वाश्रिता-

नामुपासनानां यथाश्रयभावः उद्गीथादिवदङ्गभावः । गोदोहनादिवत् तस्मन्वाक्ये फलसम्बन्धाश्रवणादङ्गभावो न विरुध्यत इत्यर्थः ॥

शिष्टेश्च ॥ ६० ॥

शिष्टिः शासनं विधानम् । "उद्गीथमुपासीत" इति विधानाच्च वर्तमाननिर्देशावगतफलसम्बन्धात्प्रागेवोद्गीथसम्बन्धोऽवगत इति तदङ्गभावो न विरुध्यते । अत उपादाननियमः ॥

समाहारात् ॥ ६१ ॥

इतश्च । " होतृसदनाद्धैवापि दुरुद्गीथमनुसमाहरति " इत्युद्गीथ वेदनहानावन्येन समाधानं ब्रूवती श्रुतिर्वेदनस्योपादाननियमं दर्शयति । दुरुद्गीथं वेदनहीनमुद्गीथम् ॥

गुणसाधारण्यश्रुतेश्च ॥ ६२ ॥

इतश्चोपादाननियमोऽवगम्यते । प्रणवगुणत्वेनावगतस्योपासनस्य साधारण्यं श्रूयते "तेनेयं त्रयी विद्या वर्तते ओमित्याश्रावयत्योमिति शंसत्योमित्युद्गायति" इति । तेनेति प्रकृतपरामर्शात्सोपासन एव प्रणवः सर्वत्र संचरति । अतः प्रणवसहभावनियमदर्शनादुपादाननियमो निश्चीयते ॥

न वा तत्सहभावाश्रुतेः ॥ ६३ ॥

न वोपादाननियमः । तत्सहभावाश्रुतेः । क्रत्वङ्गभावाश्रुतेरित्यर्थः । क्रत्वङ्गभावो हि सहभावः । " यदेव विद्यया करोति—तदेव वीर्यवत्तरम्" इति वीर्यवत्तरत्वसाधनतयाऽवगताया विद्यायाः क्रत्वङ्गतया विनियोगासम्भवात् तदङ्गभावो

हि न श्रूयते । यत्र साक्षात्फलसाधनत्वं प्रतिपाद्यते तत्र फलसाधनत्वं प्रथमं प्रतीयत इति तस्य क्रत्वङ्गतया विनियोगो न संभवतीत्यभिप्रायः ॥

दर्शनाच्च ॥ ६४ ॥

"एवं विद्ध वै ब्रह्मा यज्ञं यजमानं सर्वांश्चर्त्विजोऽभिरक्षति" इति ब्रह्मणो वेदनेन यज्ञस्य यजमानस्य ऋत्विजां च रक्षणं ब्रुवन्नन्येषां वेदनाभावं दर्शयति । तच्चोद्गीथोपासनस्यानङ्गत्वे सत्येवोपपद्यते । अतश्चोपादानानियमः ॥

इति श्रीभगवद्रामानुजविरचिते वेदान्तदीपे तृतीयस्याध्यायस्य तृतीयः पादः ।

(पुरुषार्थाधिकरणम्)

पुरुषार्थोऽतः शब्दादिति बादरायणः ॥ १ ॥

किं विद्यातः पुरुषार्थ उत कर्मण इति संशयः ॥ कर्मण इति पूर्वः पक्षः । कर्माङ्गत्वाद्विद्यायाः कर्मसु कर्तृभूतप्रत्यगात्मनो याथात्म्यप्रतिपादनपराणि वेदान्तवाक्यानि । विद्यायाः कर्माङ्गत्वं च " यदेव विद्यया करोति—तदेव वीर्यवत्तरम् " इति श्रुत्याऽवगम्यते । न च प्रकृतोद्गीथोपासनविषयत्वमस्या वक्तुं शक्यते । "यदेव विद्यया करोति" इति श्रुत्यैव सर्वकर्मसु विद्याया विनियुक्तत्वात् । श्रुतिश्च प्रकरणाद्बलीयसी । विद्यायाः कर्माङ्गत्वं कथमित्यपेक्षायाम् "तत्त्वमसि । अयमात्मा ब्रह्म" इति सामानाधिकरण्येन कर्माङ्गभूतकर्तृयाथात्म्यानुसन्धानद्वारेण विद्यायाः कर्माङ्गत्वमित्यवगम्यते । अतः कर्तृसंस्कारत्वाद्ब्रह्मविद्यायाः

कर्मण एव पुरुषार्थः । तत्र तत्र फलश्रुतिरर्थवादः स्यात् । विद्यायाः कर्माङ्गत्वे भूयांसि लिङ्गानि च दृश्यन्ते सर्ववेदान्तेषु ॥ राद्धान्तस्तु—कर्मसु कर्तुः प्रत्यगात्मनोऽर्थान्तरभूतस्य स्वसङ्कल्पकृतजगदुदयविभवलयलीलस्य निखिलहेयप्रत्यनीककल्याणैकतानानन्दैकस्वरूपस्य सर्वेश्वरस्य सत्यसङ्कल्पस्य करणाधिपरूपप्रत्यगात्माधिपस्य वेद्यस्य वेदनरूपाया विद्यायाः "ब्रह्मविदाप्नोति परम्"इत्यादिषु ब्रह्मप्राप्तिरूपफलोपदेशात् विद्यात एव फलम् । "यदेव विद्यया करोति"इति श्रुतिः प्रसिद्धवन्निर्देशात् प्रसिद्धिश्च प्रकृतोद्गीथोपासनस्यैवेति प्रस्तुतोद्गीथोपासनविशेषनिष्ठा । "तत्त्वमसि" इति सामानाधिकरण्यं च तच्छब्दनिर्दिष्टस्वसङ्कल्पकृतजगज्जन्मस्थितिध्वंसाधिकरणस्य परस्य ब्रह्मणो न जीवस्वरूपत्वपरम् । अपि तु जगत्कारणस्य ब्रह्मणो जीवशरीरकतया जीवस्यात्मत्वपरमिति "अधिकं तु भेदनिर्देशात्" इत्यादिषूक्तम् । "य आत्मनि तिष्ठन्—यस्यात्मा शरीरम्" इति च प्रत्यगात्मन आत्मत्वं परस्य ब्रह्मणः श्रुत्यन्तरे व्यक्तम् ॥ सूत्रार्थः—पुरुषार्थो न विद्यातः । कुतः । "ब्रह्मविदाप्नोति परम्" इत्यादिशब्दात् ॥

शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः ॥ २ ॥

"तत्त्वमसि"इत्यादिना सामानाधिकरण्येन ब्रह्मणः कर्मसु कर्तृस्वरूपत्वावगमात् विद्यायाः कर्तृसंस्कारद्वारेण कर्मशेषत्वात्तत्र पुरुषार्थवादोऽर्थवादमात्रम्, यथान्येषु द्रव्यसंस्कारादिष्विति जैमिनिराचार्यो मन्यते ॥

आचारदर्शनात् ॥ ३ ॥

इतश्च विद्या कर्माङ्गम् । ब्रह्मविदामाचारो हि कर्मप्रधानो

दृश्यते। यथाश्वपतिःकेकयो ब्रह्मविदग्रेसरो "यक्ष्यमाणो ह वै भगवन्तोऽहमस्मि" इत्याह। "कर्मणैव हि संसिद्धिमास्थिता जनकादयः" इति च स्मर्यते ॥

लिङ्गमिदं श्रुतिरुच्यतामित्यत्राह—

तच्छ्रुतेः ॥ ४ ॥

"यदेव विद्यया करोति" इत्यादिकायाः श्रुतेर्विद्यायाः कर्माङ्गत्वमवगम्यते। न च दुर्बलेन प्रकरणेन श्रुतिर्विद्यासामान्यविषयोद्गीथोपासनविशेषे व्यवस्थाप्यते ॥

समन्वारम्भणात् ॥ ५ ॥

"तं विद्याकर्मणी समन्वारभेते"इति विद्याकर्मणोरेकस्मिन्पुरुषे साहित्यं च विद्यायाः कर्माङ्गत्वे सत्येव भवति ॥

तद्वतो विधानात् ॥ ६ ॥

विद्यावतः कर्मविधानाच्च विद्या कर्माङ्गम्। "आचार्यकुलाद्वेदमधीत्याभिसमावृत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे" इत्यादिनाऽध्ययनवतः कर्माणि विदधदर्थावबोधपर्यन्तत्वादध्ययनस्य विद्यावत एव कर्माणि विदधातीत्यवगम्यते ॥

नियमाच्च ॥ ७ ॥

"कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः"इत्यात्मविदामायुषः कर्मसु नियमदर्शनाच्च कर्मण एव पुरुषार्थः, न विद्यात इत्यवगम्यते। अतश्च विद्या कर्माङ्गम् ॥

अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥ ८ ॥

तुशब्दात्पक्षो व्यावृत्तः । न विद्या कर्माङ्गमपि तु विद्यातः पुरुषार्थः । बादरायणस्यैवं विद्यातः फलमिति मतम् । कुतः । अधिकोपदेशात्कर्मकर्तुः प्रत्यगात्मनोऽधिकस्यार्थान्तरभूतस्य वेद्यस्य वेदनरूपविद्यायाः फलसाधनत्वोपदेशात् । तद्दर्शनात् दृश्यते हि वेदान्तवाक्येऽधिकविषयत्वं विद्यायाः । एवमेव हि "तदैक्षत बहु स्यां प्रजायेयेति । सोऽकामयत बहुस्यां प्रजायेय" इत्यादिषु बहुभवनसङ्कल्पपूर्वकसृष्ट्यादेः कर्तुः सर्वेश्वरस्य करणाधिपाधिपस्यानवधिकातिशयज्ञानानंदैकरूपस्य निखिलहेयप्रत्यनीकस्य वेद्यस्य विद्या ब्रह्मप्राप्तिफलाय विधीयते ॥

तुल्यं तु दर्शनम् ॥ ९ ॥

विद्यायाः प्रधानत्वेऽपि ब्रह्मविदामाचारदर्शनं तुल्यम् । कर्मणामनाचारदर्शनमप्यस्तीत्यर्थः "ऋषयः कावषेयाः किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे" इत्यादौ । कर्मानुष्ठानं तु फलाभिसन्धिरहितस्य कर्मणो विद्याङ्गत्वात् । त्यागस्तु फलाभिसन्धियुक्तस्य विद्याविरोधित्वादित्यभिप्रायः ॥

असार्वत्रिकी ॥ १० ॥

"यदेव विद्यया करोति" इति श्रुतिः सर्वविद्यायाः कर्माङ्गत्वं विदधातीत्येतदसङ्गतम् । अत्र विद्या शब्दाभिहिता तु न सार्वत्रिकी । अपि तूद्गीथविद्या । "यत्करोति तद्विद्यया" इति नैवं पदान्वयः । अपि तु "यदेव विद्यया करोति तदेव वीर्यवत्तरम्" इति । विद्यया क्रियमाणस्यान्यतोऽवगतस्य वीर्यवत्तरत्वं प्रति साधनभावो गम्यते । यदेवेति प्रसिद्धवन्निर्देशात् । अन्यतोऽव-

गतिर्हि "उद्गीथमुपासीत" इति सन्निहितोद्गीथविद्यायाः ॥

विभागः शतवत् ॥ ११ ॥

"तं विद्याकर्मणी समन्वारभेते" इत्यत्र विद्या च स्वस्मै फलाय कर्म च स्वस्मै फलायान्वारभत इति विभागो द्रष्टव्यः । यतो विद्याकर्मणोर्भिन्नफलत्वमुक्तम् । शतवत् यथा क्षेत्ररत्नविक्रयिणं शतद्वयमन्वेतीत्युक्ते क्षेत्रार्थं शतं रत्नार्थं शतमिति विभागो गम्यते तद्वत् ॥

अध्ययनमात्रवतः ॥ १२ ॥

"वेदमधीत्य" इत्यध्ययनमात्रवत एव कर्मविधानादनेन विद्यया न कर्माङ्गत्वमवगतम् । अध्ययनविधिर्हि आधानवदक्षरराशिग्रहणमात्रे पर्यवस्यति । गृहीतस्य स्वाध्यायस्य फलवदर्थावबोधित्वदर्शनात्तन्निर्णयफलमीमांसाश्रवणे अधीतवेदः स्वयमेव प्रवर्तते । अर्थावबोधपर्यन्तत्वेऽपि अर्थज्ञानादर्थान्तरभूता प्रत्ययावृत्तिरूपा "विद्यात् उपासीत" इति शास्त्रविहिता विद्या न कर्माङ्गम् ॥

नाविशेषात् ॥ १३ ॥

"कुर्वन्नेवेह कर्माणि" इति ब्रह्मविदायुषः कर्मनियमो दृश्यत इत्येतन्न संभवति । अविशेषात् विदुष एवेति विशेषाभावात् । किमित्यविदुषो न स्यात् । विदुषस्त्वाप्रयाणादुपासनानुवृत्तिदर्शनादर्थस्वभावाद्विदुष एवेत्यभिप्रायः ॥

स्तुतयेऽनुमतिर्वा ॥ १४ ॥

वाशब्दोऽवधारणे । "ईशावास्यमिदं सर्वम्" इति विद्याप्र-

करणात् विद्यास्तुतये कर्मानुमतिरेव । विद्यामहात्म्यात्सर्वदा कर्माणि कुर्वन्नपि तेन लिप्यते इति हि स्तुतौ भवति विद्या । वाक्यशेषे च "न कर्म्मणा लिप्यते नरः" इति श्रूयते ॥

कामकारेण चैके ॥ १५ ॥

एके शाखिनः कामकारेण च विद्यानिष्ठस्य गार्हस्थ्यास्त्रागमधीयते "किं प्रजया करिष्यामो येषां नोयमात्माऽयं लोकः" इति गार्हस्थ्यकर्म्मत्यागं ब्रुवती विद्या प्रधानमिति दर्शयति ॥

उपमर्दञ्च ॥ १६ ॥

विद्यया सर्वकर्मोपमर्दनं च विधीयते "क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे" इति । तद्विद्यायाः कर्माङ्गत्वे न सङ्गच्छते ॥

ऊर्द्धरेतस्सु च शब्दे हि ॥ १७ ॥

ऊर्द्धरेतस्सु अश्रमेषु ब्रह्मविद्यादर्शनात् तेषु चाग्निहोत्रादिकर्माभावान्न विद्याकर्माङ्गम् । ते च आश्रमाः सन्त्येव । यतो वैदिके शब्दे तेऽपि दृश्यन्ते " त्रयो धर्मस्कन्धाः । ये चेमेऽरण्ये श्रद्धा तप इत्युपासते । एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति " इत्यादौ । "यावज्जीवमग्निहोत्रम्" इत्यादिका तु श्रुतिरविरक्तविषया ॥

परामर्शं जैमिनिरचोदनाच्चापवदति हि ॥ १८ ॥

" त्रयो धर्मस्कन्धा " इत्यादिषु तेषामाश्रमाणामचोदनाद्विधानादुपासनास्तुत्यर्थं परामर्शमनुवादं जैमिनिराचार्यो मन्यते । अपि चापवदति श्रुतिराश्रमान्तरं " वीरहा वा एष

देवानां योऽग्निमुद्वासयते" इत्यादिका । अतस्ते न संत्येव ॥

अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥ १९ ॥

गृहस्थाश्रमवदाश्रमान्तरमप्यनुष्ठेयं भगवान् बादरायणो मन्यते। कुतः । तस्यापि तत्साम्यश्रुतेः । "त्रयो धर्मस्कन्धाः" इत्यत्रमादौ हि सर्वेषामाश्रमाणामेकरूपं कीर्तनम् ॥

विधिर्वा धारणवत् ॥ २० ॥

वाशब्दोऽवधारणे। सर्वेषामाश्रमाणां विधिरेवायम् । धारणवत् यथा "अधस्तात्समिधं धारयन्ननुद्रवेत । उपरि हि देवेभ्यो धारयति" इत्युनुवादसरूपेऽप्युपरिधारणस्याप्राप्तत्वेन विधिराश्रीयते एवमिहाश्रमाणामपि । अत ऊर्द्ध्वरेतस्स्वपि विद्यादर्शनाद्विद्यातः पुरुषार्थ इति ॥

(स्तुतिमात्राधिकरणम)

स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥ २१ ॥

भावशब्दाच्च ॥ २२ ॥

"ओमित्येतदक्षरमुद्गीथमुपासीत—स एष रसानां रसतमः परमः पराऽर्ध्योऽष्टमो यदुद्गीथः" इत्येवंजातीयके किं कर्माङ्गाश्रयाणां दृष्टिविशेषाणां विधिरास्थेय उत उद्गीथादिस्तुतिमात्रमिति संशयः ॥ विधित्वे सिद्धे हि गोदोहनादिवत् भवति, विधित्वमेव न सम्भवतीति पूर्वः पक्षः । "इयमेव जुहूर्यत्स्वर्गलोक आहवनीयः" इतिवत्कर्माङ्गभूतोद्गीथादिसम्बन्धितयोपादानाद्रसतमत्वादिस्तत्स्तुतिमात्रमेव न रसतमत्वादिदृष्टिविधिः॥ राद्धान्तस्तु— जुह्वादिविधिवदुद्गीथादिविधेरत्रासन्निधानाद्रसतमत्वादेरप्राप्तत्वा-

च उपासीतेति विधिप्रत्ययेन च न स्तुतिमात्रं तद्दृष्टिविधिरेव ॥ सूत्रद्वयं व्याख्यातम् ॥

(पारिप्लवार्थाधिकरणम्)

पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥ २३ ॥

तथा चैकवाक्योपबन्धात् ॥ २४ ॥

"प्रतर्दनो ह वै दैवोदासिः" इत्यादयो वेदान्तेष्वाख्यानविशेषाः किं पारिप्लव(१)प्रयोगार्था उत तत्र तत्र विद्या विशेषप्रतिपादनार्था इति संशयः ॥ " आख्यानानि शंसंति " इत्याख्यानानां पारिप्लवे विनियोगात्तदर्था इति पूर्वः पक्षः ॥ राद्धान्तस्तु—" आख्यानानि शंसन्ति " इत्युक्त्वा "मनुर्वैवस्वतो राजा" इति मन्वाद्याख्याने विनियोगस्य विशेषितत्वात् " तं मामायुरमृतमित्युपास्व । आत्मा वा अरे द्रष्टव्यः " इत्यादिविधिनैकवाक्यत्वाच्च " सोऽरोदीत् " इत्यादिवत् विद्याविश्यर्थमेव ॥ सूत्रद्वयमपि व्याख्यातम् ॥

(अग्नीन्धनाधिकरणम्)

अत एव चाग्नींधनाद्यनपेक्षा ॥ २५ ॥

ऊर्द्ध्वरेतस्स्वाश्रमेषु ब्रह्मविद्या सम्भवति नेति संशयः ॥ यज्ञाद्यभावात्तेषां तदङ्गिका विद्या न सम्भवतीति पूर्वपक्षः ॥ राद्धान्तस्तु—"यदिच्छन्तो ब्रह्मचर्यं चरन्ति । एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति " इत्यादिश्रुतिभिस्तेषां विद्यावत्त्वावगमात् तेष्वग्निहोत्राद्यनपेक्षा विद्येति निश्चीयते ॥ सूत्रार्थः—अत एव विद्यावत्त्वश्रुतेरेव आधानाद्यनपेक्षा तेषु विद्या । अग्नींधनं त्वाधानम् ॥

(१) पारिप्लवो नाम यज्ञे ऋत्विग्भिः क्रियमाणा शंसनरूपा स्तुतिः ।

(सर्वापेक्षाधिकरणम्)

सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥ २६ ॥

कर्मवत्सु गृहस्थेषु किं यज्ञादिकर्मापेक्षा विद्या उत तत्रापि केवलैवेति संशयः ॥ उर्द्ध्वरेतस्सु यज्ञाद्यनपेक्षैव अमृतत्वं साधयति चेत्कर्मनिरपेक्षाया एव साधनत्वमभ्युपगमनीयम्, तथा सति गृहस्थेष्वपि तन्निरपेक्षैव साधयितुं समर्थेति पूर्वपक्षः । न हि स्वर्गादिसाधनभूतमग्निहोत्रादिकर्म पुरुषभेदेन नानाविधाङ्गकं दृष्टम् । विविदिषन्तीति शब्दोऽपि वेदनेच्छायामेव कर्माणि विनियुङ्क्ते, न विद्यायाम् ॥ राद्धान्तस्तु—कर्मवत्सु गृहस्थेषु यज्ञादिसर्वकर्मापेक्षा विद्या । कुतः । यज्ञादिश्रुतेः । "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" इति हि यज्ञादयो विद्याङ्गत्वेन विनियुज्यन्ते । अतो गृहस्थेषु तदपेक्षा । इच्छाया इष्यमाणप्रधानत्वादिष्यमाणं ज्ञानमेव तदङ्गकमित्यर्थतोऽवगम्यते । यथाऽश्वो गमनसाधनभूतोऽपि स्वपरिकरबन्धरूपपरिकर्मापेक्ष एवं मोक्षसाधनभूतविद्या नित्यनैमित्तिकपरिकर्मापेक्षा । उर्द्ध्वरेतस्सु च स्वाश्रमविहितकर्मैव परिकर्म भवतीति तेष्वपि विद्यासम्बन्धः शास्त्रादवगम्यते । शास्त्रैकसमधिगम्ये हि यथाशास्त्रमभ्युपगन्तव्यम् ॥ सूत्रमपि व्याख्यातम् ॥

(शमदमाद्यधिकरणम्)

शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदङ्गतया
तेषामप्यवश्यानुष्ठेयत्वात् ॥ २७ ॥

किं विद्यानिष्पत्तये गृहस्थैः शमदमादय उपादेया उत नेति संशयः ॥ गृहस्थानां करणव्यापाररूपकर्माङ्गत्वाद्विद्यायाः तद्विपरीतरूपशमदमाद्युपादानासामर्थ्यादूर्द्ध्वरेतःसु कर्मरहितेषु शमदमादिविनियोगो भविष्यति, यथा यज्ञादिविनियोगः

कर्मवत्सु गृहस्थेषु, तस्मात् गृहस्थैरनुपादेयाः शमादय इति पूर्वः पक्षः ॥ राद्धान्तस्तु—"तस्मादेवंविच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्येत्" इति सामान्येन विद्याङ्गतया विनियोगात् गृहस्थैरप्युपादेयाः । न च कर्मवतां तेषां शमदमाद्युपादानासामार्थ्यम् । भिन्नविषयत्वाच्छमादीनाम् । विहितेषु हि कर्म्मसु व्यापारः । अविहितेषु प्रयोजनशून्येषु च शमादयः । अतः शमादिविनियोगो यज्ञादिविनियोगवन्न संकोचमर्हति ॥ सूत्रार्थः—यद्यपि गृहस्थो यज्ञादिकर्मसु विनियुक्तः । तथापि शमदमाद्युपेतः स्यात् । कुतः । "शान्तो दान्त" इत्यादिना तद्विधेः । तदङ्गतया विद्यानिष्पत्तये तेषामवश्यानुष्ठेयत्वाच्च । एकाग्रतानिष्पाद्यत्वाच्छमदमादिभिरेव विद्यानिष्पत्तिरित्यर्थः । यज्ञादिकर्माण्यपि पापनिर्हरणद्वारेणैकाग्रतामापादयन्तीत्यभिप्रायः ॥

(सर्वान्नानुमत्यधिकरणम्)

सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥ २८ ॥

वाजिनां छन्दोगानां च प्राणविद्यायां "न ह वा एवंविदि किं चनानन्नं भवति" इति सर्वान्नानुमतिः संकीर्त्यते । किं प्राणविदः सर्वान्नानुमतिः सर्वदा उत प्राणात्ययापत्ताविति संशयः ॥ अविशेषात्सर्वदेति पूर्वपक्षः ॥ अतिशयितशक्तेर्ब्रह्मविदोऽपि ह्युच्छिष्टपरिग्रहभक्षणयोः प्राणात्ययापत्तावेव दर्शनादल्पशक्तेः प्राणविदः किं पुनरिति प्राणात्ययापत्तावेवेति राद्धान्तः ॥ सूत्रार्थः—च शब्दोऽवधारणे । विदः सर्वान्नानुमितिः प्राणात्यये एव । कुतः । तद्दर्शनात् अतिशयितशक्तेर्ब्रह्मविदः प्राणात्ययापत्तावेव सर्वान्नानुमतिदर्शनात् ॥

अबाधाच्च ॥ २९ ॥

" आहारशुद्धौ सत्वशुद्धिः सत्वशुद्धौ ध्रुवा स्मृतिः " इत्याहारशुद्धिविधेरबाधाच्च प्राणात्यय एव ॥

अपि स्मर्यते ॥ ३० ॥

" प्राणसंशयमापन्नो योऽन्नमत्ति यतस्ततः ।
लिप्यते न स पापेन पद्मपत्रमिवांभसा ॥" इति
प्राणसंशय एव सर्वान्नानुमतिः स्मर्यते च ॥

शब्दश्चातोऽकामकारे ॥ ३१ ॥

यतः सर्वान्नानुमतिः प्राणात्यये श्रुता अतोऽकामकारे प्रतिषेधकशब्दश्चोपपद्यते इत्यर्थः । अस्ति हि काठकानां कामकारे प्रतिषेधकः शब्दः " तस्माद्ब्राह्मणः सुरां न पिबति पाप्मनोत्सृजा " इति । पाप्मना संसृष्टो न भवामीति मत्वा सुरां न पिबतीत्यर्थः ॥

(विहितत्वाधिकरणम्)

विहितत्वाच्चाश्रमकर्मापि ॥ ३२ ॥

किं यज्ञादयो विद्याङ्गभूताः केवलाश्रमस्याप्यङ्गभूता उत नेति संशयः ॥ केवलाश्रमस्याप्यङ्गत्वे नित्यानित्यसंयोगरूपविरोधः प्रसज्यते इति नाङ्गभूताः केवलाश्रमस्येति पूर्वपक्षः ॥ राद्धान्तस्तु—यदैकेनैव विनियोगेनोभयाङ्गत्वमिष्यते तदा नित्यानित्यसंयोगविरोधः। इह तु " यावज्जीवमग्निहोत्रं जुहुयात् । तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन" इति विनियोगपृथक्त्वेन विरोधः परिह्रियते। यथा ऽग्नि-

होत्रादीनामेव कर्मणाम् । जीवनाधिकारकमनाधिकारयोरेवाधिकारभेदस्यास्फुटत्वात् स्फुटीकरणाय पुनरिह चिन्त्यते ॥ सूत्रार्थः—"यावज्जीवमग्निहोत्रं जुहुयात्" इत्यादिना केवलगृहस्थाश्रमिणो जीवननिमित्ततया विहितत्वादेव यज्ञादिकेवलाश्रमकर्मापि ॥

सहकारित्वेन च ॥ ३३ ॥

" तमेतं वेदानुवचनेन " इत्यादिना विद्यासाधनत्वेन विहितत्वाच्च विद्यासहकारित्वेन चानुष्ठेयं यज्ञादिकर्म्म । विनियोगपृथक्त्वेन विरोधः परिह्रियते इत्यभिप्रायः ॥

सर्वथापि त एवोभयलिङ्गात् ॥ ३४ ॥

सर्वथापि उभयत्र विनियोगेऽपि त एव यज्ञादयः । कुतः । उभयलिङ्गात् उभयत्र प्रत्यभिज्ञानाख्यलिङ्गात् ॥

अनभिभवं च दर्शयति ॥ ३५ ॥

" धर्मेण पापमपनुदति " इत्यादिना तैरेव यज्ञादिभिर्विद्याया उत्पत्तिप्रतिबन्धाभावरूपानभिभवं च दर्शयति । अत उभयत्र विनियोगात्केवलाश्रमिणां मुमुक्षूणां चानुष्ठेया यज्ञादयः ॥

(विधुराधिकरणम्)

अन्तरा चापि तु तद्दृष्टेः ॥ ३६ ॥

विधुरादीनामनाश्रमिणां ब्रह्मविद्यायामधिकारोऽस्ति नेति संशयः ॥ आश्रमधर्मेतिकर्तव्यताकत्वाद्विद्यायास्तदभावात्तेषामनधिकार इति पूर्वपक्षः ॥ राद्धान्तस्तु—उर्द्धरेतस्स्वपि रैक्कादिष्वनाश्रमिषु विद्यानिष्ठत्वदर्शनात् आश्रमानियतैर्जपोपवासादिभिरेव तेषां विद्यानुग्रहो भवतीत्यस्त्येवाधिकारः ॥ सूत्रा-

र्थस्तु—तुशब्दः पक्षव्यावृत्त्यर्थः । चशब्दोऽवधारणे । अन्तराऽपि आश्रमानंतरापि वर्तमानानामनाश्रमिणामप्यधिकारोऽस्त्येव । कुतः । तद्दृष्टे रैक्वादिषु विद्यानिष्ठत्वदृष्टेः ॥

अपि स्मर्यते ॥ ३७ ॥

अपि चानाश्रमिणामपि जपादिभिरेव विद्यानुग्रहः स्मर्यते “ जप्येन चापि संसिद्ध्येत् ” इत्यादिना ॥

विशेषानुग्रहश्च ॥ ३८ ॥

आश्रमानियतधर्मविशेषेण विद्यानुग्रहः श्रूयते च “ तपसा ब्रह्मचर्येण श्रद्धया विद्यया चात्मानमन्विच्छेत् ” इति ॥

अतस्त्वितरज्ज्यायो लिङ्गाच्च ॥ ३९ ॥

अतोऽनाश्रमित्वादितरदाश्रमित्वं ज्यायः । धर्मभूयस्त्वात् । लिङ्गाच्च स्मृतेश्चेत्यर्थः । “ अनाश्रमी न तिष्ठेत्तु दिनमेकमपि द्विजः ” इति हि स्मर्यते । तस्मादनाश्रमित्वेन विद्यानिष्ठत्वमापद्विषयमित्यभिप्रायः ॥

(तद्भूताधिकरणम्)

तद्भूतस्य तु नातद्भावो जैमिनेरपि नियमा-
त्तद्रूपाभावेभ्यः ॥ ४० ॥

नैष्ठिकवैखानसपरिव्राजकानां स्वाश्रमेभ्यः प्रच्युतानामपि विद्याधिकारोऽस्ति नेति संशयः ॥ विधुरादिवज्जपादिभिरपि तदनुष्ठानसम्भवादस्त्यधिकार इति पूर्वपक्षः ॥ राद्धान्तस्तु—नैष्ठिकादीनां स्वाश्रमभ्रष्टानां प्रायश्चित्ताभावस्मरणात् शिष्टबहि-

ष्कृतत्वाच्च तेषामनधिकारः ॥ सूत्रार्थः—तद्भूतस्य तु नातद्भावः नैष्ठिकादिभूतस्यातथाभावो न भवति । कुतः । तद्रूपाभावेभ्यः शास्त्रे नियमात् । तद्रूपाभावाः नैष्ठिकादिधर्माभावाः । तेभ्यो नियच्छन्ति हि शास्त्राणि " ब्रह्मचार्याचार्यकुलवासी तृतीयोऽत्यन्तमात्मानमाचार्यकुलेऽवसादयन् " इति नैष्ठिकस्य तत्रैव नियमः । "अरण्यमीयात्ततो न पुनरेयात्" इति वैखानसस्य । " संन्यस्याग्नीन्न पुनरावर्तयेत् " इति च परिव्राजकस्य । अत एतेषामनाश्रमित्वेनावस्थानाभावात् विद्याधिकारो न सम्भवतीति । जैमिनेरप्यविगीतोऽयम् ॥

न चाधिकारिकमपि पतनानुमानात्तदयोगात् ॥ ४१ ॥

अधिकारिकमधिकारिलक्षणोक्तं " अवकीर्णिपशुश्च तद्वात् " इत्येव प्रायश्चित्तं नैष्ठिकस्य न संभवति । तदयोगात् । तस्य हि पतनं स्मर्यते प्रायश्चित्ताभाववचनेन ।

' आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते द्विजः ।
प्रायश्चित्तं न पश्यामि येन शुद्ध्येत्स आत्महा"इति ।

अत उपकुर्वाणब्रह्मचारिविषयमाधिकारिकम् ॥

उपपूर्वमपीत्येके भावमशनवत्तदुक्तम् ॥ ४२ ॥

एके प्रायश्चित्तभावमपि मन्यन्ते । यत उपपूर्वमुपपातकमिदम् । अशनवत् मध्वशनादिनिषेधतत्प्रायश्चित्तवद्भवत्येवेत्यर्थः । कुतः । उपकुर्वाणब्रह्मचारिण उक्तमाधिकारिकमस्यापि भवति । तदुक्तं स्मृतिकारैः "उत्तरेषां चैतदविरोधि"इति । उपकुर्वाण ब्रह्मचारिण उक्तो धर्मः उत्तरेषामाश्रमिणां स्वाश्रमाविरोधी भवत्येवेत्यर्थः ॥

बहिस्तूभयथा स्मृतेराचाराच्च ॥ ४३ ॥

उभयथाऽपि उपपातकित्वे महापातकित्वेऽपि नैष्ठिकात्प्रच्युतो बहिर्भूतः कर्माधिकारात् । "प्रायश्चित्तं न पश्यामि" इति स्मृतेराचाराच्च । वर्जयन्त्येनं शिष्टविद्योपदेशादौ । यद्यपि कल्मषानिर्हरणाय कैश्चित्प्रायश्चित्तमुपदिश्यते । तथापि कर्माधिकारापादनी शुद्धिस्तेषां न सम्भवतीत्यभिप्रायः ॥

(स्वाम्यधिकरणम्)

स्वामिनः फलश्रुतेरित्यात्रेयः ॥ ४४ ॥

उद्गीथाद्युपासनं किं यजमानेनानुष्ठेयं उत ऋत्विजेति संशयः ॥ "यदेव विद्यया करोति तदेव वीर्यवत्तरम्" इति क्रतुवीर्यवत्तरत्वफलं यजमानस्येति दहरोपासनादिवद्यजमानेनानुष्ठेयमिति पूर्वपक्षः ॥ कर्माङ्गाश्रयत्वादस्योपासनस्य कर्मणां चार्त्विज्यत्वेनैतदपि ऋत्विजानुष्ठेयं गोदोहनादिवदिति राद्धान्तः ॥ सूत्रार्थः—स्वामिनो यजमानस्योद्गीथाद्युपासने कर्तृत्वम् । कुतः । तस्यैव फलश्रुतेरित्यात्रेयो मन्यते ॥

आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रियते ॥ ४५ ॥

क्रत्वङ्गत्वेन क्रत्वधिकृतस्यैवास्मिन्नुपासनेऽधिकारात् क्रतोश्चार्त्विज्यत्वेनैतदप्यार्त्विज्यमित्यौडुलोमिराचार्यो मन्यते । यजमानफलसाधनत्वेऽपि क्रतोस्तदनुष्ठानाय हि ऋत्विक् परिक्रियते ॥

(सहकार्यन्तरविध्यधिकरणम्)

सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥ ४६ ॥

"तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः" इत्यत्र मौनं विद्याङ्गतया विधीयत उतानूद्यत इति संशयः ॥ मौनस्य मननरूपत्वात् "श्रोतव्यो मन्तव्यः" इति च प्राप्तत्वेनानूद्यत इति पूर्वपक्षः ॥ राद्धान्तस्तु—मुनिशब्दस्य प्रकृष्टमननशीले प्रसिद्धेः प्रकृष्टमननमुपास्यविषयाभ्यासरूपं विद्यानिष्पत्तये विधीयते इति ॥ सूत्रार्थः—तद्वतो विद्यावतः सहकार्यान्तरं मौनं विधीयत इति युक्तम् । विध्यादिवदत्रापि विधीयत इति विधिः यज्ञदानप्रभृत्याश्रमधर्मः । आदिशब्दात् श्रवणमनने गृह्येते । आश्रमधर्मवत् श्रवणमननवच्च पाण्डित्यबाल्ययोस्तृतीयं सहकार्यन्तरं मौनमपूर्वं विधीयते । कुत इत्यत्राह । पक्षेणेति । मुनिशब्दस्य प्रकृष्टमननयुक्ते पक्षेण प्रसिद्धेरित्यर्थः ॥

कृत्स्नभावात्तु गृहिणोपसंहारः ॥ ४७ ॥

सर्वाश्रमिणां विद्यावत्त्वेऽपि छान्दोग्ये "स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसम्पद्यते" इति गृहस्थधर्मेणोपसंहारः सर्वाश्रमधर्मप्रदर्शनार्थः । कुतः । कृत्स्नभावात् कृत्स्नेष्वाश्रमिषु विद्यायाः सद्भावादित्यर्थः ॥

मौनवदितरेषामप्युपदेशात् ॥ ४८ ॥

"अथ मुनिः" इत्येतस्मिन्नपि वाक्ये "अथ भिक्षाचर्यं चरति" इति पारिव्राज्यैकान्तधर्मेणोपसंहारः सर्वाश्रमधर्मप्रदर्शनार्थः । भिक्षाचर्यामौनादिवदितरेषां चाश्रमधर्माणां यज्ञादीनामप्युपदेशात् ॥

(अनाविष्काराधिकरणम्)

अनाविष्कुर्वन्नन्वयात् ॥ ४९ ॥

"तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत्" इत्यत्र किं बाल्यस्य कर्म कामचारादिकं सर्वं विदुषोपादेयं उत विद्यामाहात्म्यानाविष्कार इति संशयः ॥ "बाल्येन तिष्ठासेत्" इत्यविशेषविधानात्कामचारादिकं सर्वमप्युपादेयमिति पूर्वपक्षः। विदुषो विशेषविधानाद्विद्यामाहात्म्याच्च निषेधश्रुतयो बाधिता भवेयुः ॥ राद्धान्तस्तु—पाण्डित्यप्रयुक्तस्वमाहात्म्याद्यनाविष्कार एव विद्यान्वययोग्यतयोपादेयः। इतरस्य कामचारादेः "नाविरतो दुश्चरितात्" इत्यादिशास्त्रैर्विद्योत्पत्तिविरोधित्वावगमात्। अतो यथा बालः स्वाभिजनाद्यनाविष्कुर्वन् वर्तते तथा विद्वान् वर्ततेत्येतदेव युक्तं ॥ सूत्रमपि व्याख्यातम् ॥

(ऐहिकाधिकरणम्)

ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ॥ ५० ॥

मोक्षव्यतिरिक्ताभ्युदयफलमुपासनं किं स्वसाधनभूतपुण्यकर्मानन्तरमेवोत्पद्यते उतानन्तरमन्यदा वेत्यनियम इति संशयः ॥ साधननिर्वृत्तौ विलम्बहेत्वभावादनन्तरमेवेति पूर्वपक्षः ॥ राद्धान्तस्तु—अप्रस्तुते प्रबलकर्मान्तरप्रतिबन्धे सत्यनन्तरम्, प्रस्तुते सति तदुत्तरकालमित्यनियमः। दृश्यते हि प्रबलकर्मान्तरेण फलप्रतिबन्धः। "यदेव विद्यया करोति—तदेव वीर्यवत्तरम्" इत्युद्गीथोपासनस्य क्रतोः कर्मान्तरेण फलाप्रतिबन्धः फलमित्यभ्युपगमात् ॥ सूत्रमपि व्याख्यातम्। ऐहिकमभ्युदयफलमित्यर्थः ॥

(मुक्तिफलाधिकरणम्)

एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॥ ५१ ॥

किं मुक्तिफलान्युपासनानि स्वसाधनभूतातिशायितपुण्यकर्मानन्तरमुत्पद्यन्त उत पूर्ववदनियम इति संशयः ॥ मुक्तिफलोपासनसाधनभूतकर्मणां सर्वकर्मभ्यो बलवत्तरत्वेन प्रतिबन्धाभावादनन्तरमेवोत्पद्यन्ते इति पूर्वः पक्षः॥ तत्रापि ब्रह्मविदपचारस्य ततोपि बलवत्तरत्वेन प्रतिबन्धसम्भवादनियम एवेति राद्धान्तः ॥ सूत्रार्थः—मुक्तिफलानामप्येवमनियमः। कुतः। तदवस्थावधृतेः । प्रतिबन्धाभावे सति फलकालावधृतेः । द्विरुक्तिरध्यायपरिसमाप्तिं द्योतयति ॥

इति श्रीभगवद्रामानुजविरचिते वेदान्तदीपे
तृतीयस्याध्यायस्य चतुर्थः पादः ॥ ४ ॥

वेदान्तदीपे

चतुर्थः ऽध्यायः ।

(आवृत्त्यधिकरणम्)

आवृत्तिरसकृदुपदेशात् ॥ १ ॥

" ब्रह्मविदाप्नोति परम् । तमेवं विद्वानमृत इह भवति " इत्यादिवेदान्तविहितं वेदनं किं सकृत्कृतमेव शास्त्रार्थ उतासकृदावृत्तमिति संशयः ॥ " स यो ह वै तत् परं ब्रह्म वेद ब्रह्मैव भवति "इति ब्रह्मवेदनस्य परमाप्तिसाधनत्वश्रुतेः सकृत्कृतेपि वेदने शास्त्रार्थनिर्वृत्तेः सकृदेवेति पूर्वः पक्षः ॥ राद्धान्तस्तु–" यस्तद्वेद यत्स वेद स मयैतदुक्तः " इत्युपक्रम्य " अनुम एतां भगवो देवतां शाधि यां देवतामुपास्से " इत्येकस्मिन्वाक्ये विद्युपास्योर्व्यतिरेकेण प्रयोगदर्शनात्समानार्थेषु च "ब्रह्मविदाप्नोति परम् । आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य'इत्यादिषु ध्यानवेदनयोर्व्यतिकरदर्शनाच्च ध्यानोपासनादिशब्दवाच्यमसकृदावृत्तं स्मृतिसन्तानरूपं वेदनमेव शास्त्रार्थ इति निश्चीयते ॥ सूत्रार्थः–आवृत्तिरसकृत् वेदनशास्त्रार्थावृत्तिरसकृत् । असकृदावृत्तं वेदनं ध्यानशब्दवाच्यमित्यर्थः । कुतः । उपदेशात् वेदनविधायिसमानशास्त्रैर्ध्यातव्य उपासीतेत्युपदेशात् ॥

लिङ्गाच्च ॥ २ ॥

लिङ्गं स्मृतिः । स्मर्यते चायमर्थः । "मां ध्यायन्त उपासते, तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ॥ ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ॥

तद्रूपप्रत्यये चैका सन्ततिश्चान्यनिःस्पृहा ।
तद्ध्यानप्रथमैः षड्भिरङ्गैर्निष्पाद्यते तथा ॥" इति ।

(आत्मत्वोपासनाधिकरणम्)

आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥ ३ ॥

किं उपास्यं ब्रह्मोपासितुरन्यत्वेनानुसन्धेयमुतात्मत्वेनेति संशयः ॥ "अधिकं तु भेदनिर्देशात् । अधिकोपदेशात्" इत्यादिषूपासितुरुपास्यस्यान्यत्वोपपादनाद्यथावस्थितस्यैवोपास्यत्वाच्चान्यत्वेनोपास्यमिति पूर्वः पक्षः ॥ राद्धान्तस्तु "त्वं वाअहमस्मि भगवो देवते अहं वै त्वमसि" इति पूर्वे उपासितार उपास्यमात्मत्वेनोपगच्छन्ति। अत आत्मेत्येवोपास्यमिति। तानुपासितॄन् प्रत्यर्थान्तरभूतस्य ब्रह्मण उपासितुरात्मत्वं ग्राहयन्ति शास्त्राणि "य आत्मनि तिष्ठन्नात्मनोऽन्तरो यमात्मा न वेद यस्यात्मा शरीरं य आत्मानमन्तरो यमयति स त आत्माऽन्तर्याम्यमृतः"इत्युपासिता परमात्मनः शरीरं परमात्मा च उपासितुरात्मेति प्रतिपादनेन तथा "सर्वं खल्विदं ब्रह्म तज्जलान्" इति "सन्मूलाः सोम्येमाः सर्वाः प्रजाः सदायतनाः सत्प्रतिष्ठाः–ऐतदात्म्यमिदं सर्वम्" इति च तदायत्तस्वरूपस्थितिप्रवृत्तिप्रतिपादनेन च। एवमुपासितुः स्वात्मनोऽप्यात्मत्वात् ब्रह्मणो यथावस्थितस्वात्मशरीरकब्रह्मानुसन्धानेऽहमित्येवानुसन्धेयम् । यथा मनुष्योऽहमिति स्वशरीरस्य स्वप्रकारैकस्वभावतया प्रकारिणि स्वात्मनि पर्यवसानम् तथास्वात्मनोऽपि परमात्मशरीरतया परमात्मप्रकारत्वेन प्रकारिणि

परमात्मन्येव सोऽहंबुद्धिशब्दयोः पर्यवसानमित्यस्यार्थस्य स्थैम्ने अहं ब्रह्मेत्येवोपासीतेत्युक्तं भवति ॥ सूत्रमपि व्याख्यातम् ॥

(प्रतीकाधिकरणम्)

न प्रतीके न हि सः ॥ ४ ॥

ब्रह्मदृष्टिरुत्कर्षात् ॥ ५ ॥

"मनो ब्रह्मेत्युपासीत" इत्यादिप्रतीकोपासनेष्वप्यात्मत्वेनानुसन्धानं कर्तव्यं उत नेति संशयः ॥ "मनो ब्रह्मेत्युपासीत" इति ब्रह्मोपासनत्वाविशेषादात्मेत्येवानुसन्धेय इति पूर्वः पक्षः ॥ राद्धान्तस्तु—न प्रतीके आत्मानुसन्धानं कार्यम् । कुतः । नहि मनआदिरुपासितुरात्मा । न च तत्र ब्रह्मोपास्यम् । ब्रह्मदृष्ट्या मनआदिरुपास्यः । अपकृष्टे ह्युत्कृष्टदृष्टिरभ्युदयाय भवतीति । यथा भृत्यादौ राजदृष्टिः ॥ सूत्रद्वयं च व्याख्यातम् ॥

(आदित्यादिमत्यधिकरणम्)

आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥ ६ ॥

"य एवासौ तपति तमुद्गीथमुपासीत" इत्यादिकर्माङ्गाश्रयोपासनेषु किमुद्गीथादावादित्यादिदृष्टिः कार्या उत आदित्यादिषु उद्गीथादिदृष्टिरिति संशयः ॥ कर्मणः फलसाधनतयोत्कर्षादादित्यादेर्देवतात्वेन तद्गुणत्वाच्च आदित्यादौ उद्गीथादिदृष्टिः कार्येति पूर्वः पक्षः ॥ राद्धान्तस्तु—कर्मणोऽपि फलसाधनत्वमादित्यादिदेवताराधनद्वारेणेत्यादित्यादेरेवोत्कर्षोपपत्तेरादित्यादिमतय एव आदित्यादिदृष्टय एव कर्माङ्ग उद्गीथादौ कार्याः ॥ सूत्रमपि व्याख्यातम् ॥

(आसीनाधिकरणम्)

आसीनः सम्भवात् ॥ ७ ॥

किमिदं ब्रह्मोपासनमासीनः कुर्यादुतासीनः शयानास्तिष्ठन्गच्छन्वेत्यनियम इति संशयः ॥ विशेषाश्रवणादनियम इति पूर्वः पक्षः ॥ राद्धान्तस्तु—आसीनस्यैवैकाग्रता सम्भवादेकाग्रतामूलत्वाच्चोपासनस्यासीन एव कुर्यात् ॥ सूत्रमपि व्याख्यातम् ॥

ध्यानाच्च ॥ ८ ॥

" निदिध्यासितव्यः " इत्युपासनस्य ध्यानरूपत्वाच्चैकाग्रतावश्यंभाविनी । ध्यानं हि विजातीयप्रत्ययान्तराव्यवहितं तैलधारावदविच्छिन्नस्मृतिसन्तानरूपम् ॥

अचलत्वं चापेक्ष्य ॥ ९ ॥

निश्चलत्वं चापेक्ष्य ध्यानवाचो युक्तिः पृथिव्यादिषु दृश्यते "ध्यायतीव पृथिवी ध्यायतीवान्तरिक्षं ध्यायतीव द्यौः" इत्यादिका । अतो ध्यायतः पृथिव्यादिवदचलत्वमासीनस्यैव संभवतीति ॥

स्मरन्ति च ॥ १० ॥

स्मरन्ति चासीनस्यैव ध्यानं " उपविश्यासने युंज्याद्योगमात्मविशुद्धये " इति ॥

यत्रैकाग्रता तत्राविशेषात् ॥ ११ ॥

यस्मिन् देशे यस्मिंश्च काले मनस एकाग्रता तत्र देशे काले चोपासनं कार्यम् शर्करादिरहिते मनोऽनुकूले शुचौ देश इत्येतदतिरिक्तविशेषाग्रहणात् यथा देशकालयोरेकाग्रतायामवि-

शेषः तथा स्थितिगत्यादौ। असीनस्य तु विशेषोऽस्तीत्यभिप्रायः॥

(आप्रयाणाधिकरणम्)

आप्रयाणात्तत्रापि हि दृष्टम् ॥ १२ ॥

तदिदमपवर्गसाधनमुपासनमेकस्मिन्नहनि कार्यमुत प्रत्यहमाप्रयाणमनुवर्तनीयं इति संशयः॥ एकस्मिन्नेवाहनि शास्त्रार्थस्य कृतत्वात्तावतैव परिसमापनीयम्, "यावदायुषम्" इति तु वचनं विधिशब्दाभावाद्विद्यायाः फलेनोसंहारपरमिति पूर्वपक्षः॥ राद्धान्तस्तु—आप्रयाणादनुवर्तनीयम्। कुतः। तत्रापि हि दृष्टं "स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते" इति। अप्राप्तत्वेनानुवादत्वासंभवाद्विधिरेवायमिति॥

(तदधिगमाधिकरणम्)

तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥ १३॥

विदुष उत्तरपूर्वाघयोरश्लेषविनाशौ किं संभवत उत नेति संशयः॥ "नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि" इति भोगादेव कर्मक्षयश्रवणादश्लेषविनाशश्रुतिः कथं चिद्विद्यास्तुत्यर्थतया नेयेति पूर्वः पक्षः॥ राद्धान्तस्तु—द्वयोः शास्त्रयोर्भिन्नविषयत्वेन विरोधाभावात् संभवत एव। कर्मणां हि फलजननसामर्थ्यं द्रढयति "नाभुक्तं क्षीयते कर्म" इति। "एवमेवंविदि पापं कर्म न श्लिष्यते। एवं हास्य सर्वे पाप्मानः प्रदूयन्ते" इति च श्रुतिर्विद्यायास्तत्सामर्थ्यनिवारणशक्तिविषयेति। यथाऽग्निजलयोः शीतजननतन्निवारणशक्तिविषये प्रमाणे न विरुध्येते॥ सूत्रमपि व्याख्यातम्॥

(इतराधिकरणम् ।)

इतरस्याप्येवमसंश्लेषः पाते तु ॥ १४ ॥

किमसंश्लेषविनाशौ पुण्यकर्मण्यपि समानावुत नेति संशयः ॥ पुण्यकर्मफलस्य सुखरूपत्वेन विदुषोऽनिष्टत्वाभावान्न समानाविति पूर्वपक्षः ॥ राद्धान्तस्तु—मुमुक्षोर्मोक्षविरोधित्वेनानिष्टत्वसाम्यादश्लेषविनाशौ समानावेव ॥ सूत्रार्थः—इतरस्य पुण्यस्याप्यनिष्टफलत्वसाम्यादेवमश्लेषविनाशौ । विद्यानुगुणस्य तु वृष्ट्यन्नारोग्यादिफलस्य शरीरपातादूर्द्ध्वमनिष्टत्वादश्लेषः ॥

(अनारब्धकार्याधिकरणम्)

अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥ १५ ॥

विद्योत्पत्तेः पूर्वकृतयोः पुण्यपापयोरविशेषेण विनाश उतानारब्धकार्ययोरेवेति संशयः ॥ "सर्वे पाप्मानः प्रदूयन्ते" इति विशेषाभावात् अविशेषेणेति पूर्वपक्षः ॥ राद्धान्तस्तु—"तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये " इत्युत्पन्नविद्यस्यापि शरीरमोक्षावधित्वश्रुतेः सर्वविनाशे शरीरस्थित्यनुपपत्तेश्चानारब्धकार्ययोरेव विनाशः ॥ सूत्रं च व्याख्यातम् ॥

(अग्निहोत्राद्यधिकरणम्)

अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥ १६ ॥

अग्निहोत्राद्याश्रमधर्मः किं विदुषोऽनुष्ठेय उत नेति संशयः ॥ सुकृतदुष्कृतयोरश्लेषविनाशाभिधानादाश्रमधर्मस्यापि सुकृतसाम्येन कार्याश्लेषादननुष्ठेय इति पूर्वः पक्षः ॥ राद्धान्तस्तु—आश्रमधर्मस्य तु विद्योत्पत्तिरेव कार्यमिति तत्कार्यायैवानुष्ठेयः । दृश्यते हि " तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन

दानेन"इत्यादिना विद्योत्पत्तिकार्यत्वम् । विद्या चाप्रयाणादह-रहरभ्यासाधेयातिशयोत्पाद्यैव ॥ सूत्रं च व्याख्यातम् ॥

यदि अग्निहोत्रादि साधुकृत्या विद्योत्पत्त्यर्था पूर्वकृता च साधुकृत्याऽननुभूतफला प्रारब्धफला च विद्यानष्टा "सुहृदः साधुकृत्याम्" इत्यस्य को विषय इत्याशङ्क्याह—

अतोऽन्याऽपि ह्येकेषामुभयोः ॥ १७ ॥

अतोऽग्निहोत्रादिसाधुकृत्यायाः पूर्वकृतायाश्चोभयोरन्याऽपि कारीर्यादिसाधुकृत्या वृष्ट्यन्नाद्यर्थितया विदुषाऽनुष्ठिता प्रबलकर्मान्तरप्रतिबद्धफला साधुकृत्याऽस्त्येव । तद्विषयमेकेषां शाखिनां "सुहृदः साधुकृत्याम्" इति वचनम् ॥

अनुष्ठितस्य कर्मणः फलप्रतिबन्धसम्भवं पूर्वोक्तं स्मारयति—

यदेव विद्ययेति हि ॥ १८ ॥

उक्तं ह्युद्गीथविद्यायाः क्रतोः कर्मान्तरप्रतिबन्धाभावः फलमिति । अतः प्रतिबद्धफला साधुकृत्यास्त्यवानादिकालप्रवृत्ता ॥

(इतरक्षपणाधिकरणम्)

भोगेन त्वितरे क्षपयित्वाऽथ संपद्यते ॥ १९ ॥

इतरे आरब्धकार्ये पुण्यपापे किं विद्यायोनिशरीरावसाने उत तच्छरीरावसाने शरीरान्तरावसाने वेत्यनियम इति संशयः ॥ "यावन्न विमोक्ष्ये अथ संपत्स्ये" इति संपत्तेः शरीरविमोक्षमात्रविलम्बश्रुतेस्तच्छरीरावसाने इति पूर्वपक्षः ॥ राद्धान्तस्तु-आरब्धफलयोः कर्मणोर्भोगेनैव क्षपयितव्यत्वाभिप्रायेण "यावन्न विमोक्ष्ये अथ संपत्स्ये"इत्युच्यते। शरीरमतन्त्रम्। कर्मविषयौ

हि बन्धमोक्षौ । अतः प्रारब्धफले पुण्यपापे यावता शरीरेण समापनीये तावता क्षपयित्वा " अथ संपत्स्ये " इत्यनियम एव ॥ सूत्रं च व्याख्यातम् ॥

इति श्रीभगवद्रामानुजविरचिते वेदन्तदीपे चतुर्थस्याध्यायस्य प्रथमः पादः ।

(वागधिकरणम्)

वाङ् मनसि दर्शनाच्छब्दाच्च ॥ १ ॥

" अस्य सोम्य पुरुषस्य प्रयतो वाङ् मनसि संपद्यते मनः प्राणे " इत्यादिकोत्क्रान्तिविषयाऽऽम्नायते । किं वागिन्द्रियं मनसि संपद्यते उत वाग्वृत्तिमात्रमिति संशयः ॥ वाचो मनःप्रकृतित्वाभावात्स्वरूपलयस्तत्र न सम्भवतीति वाग्वृत्तिमात्राभिप्रायमिति पूर्वपक्षः ॥ राद्धान्तस्तु—अकारणे संपत्त्यभावस्य वाग्वृत्तावपि तुल्यत्वदर्शनात् वाङ्मनसीति वाक्स्वरूपस्यैव संपत्तिशब्दाच्च स्वरूपमेव संपद्यते । अकारणे लयाभावात्संपत्तिशब्दः संयोगाभिप्रायः ॥ सूत्रं च व्याख्यातम् ॥

अत एव सर्वाण्यनु ॥ २ ॥

यतो वाचो मनसि संयोगमात्रमुच्यते न तु लयः अत एव तदानीं "सर्वाणीन्द्रियाणि वाचमनु मनसि संपद्यन्ते" इति वचनमुपपन्नम् " तस्मादुपशान्ततेजा अपुनर्भवमिन्द्रियैर्मनसि संपद्यमानैः " इति ॥

(मनोऽधिकरणम्)

तन्मनः प्राण उत्तरात् ॥ ३ ॥

" मनः प्राणे " इत्यत्र किं प्राणशब्देनाप उच्यन्ते उत प्राण एवेति संशयः ॥ प्राणस्य मनः प्रकृतित्वाभावात् " अन्नमयं हि सोम्य मनः " इति मनसोऽन्नमयत्वश्रवणात् अपाश्चान्नस्य प्रकृतित्वेन तत्संपत्तिरुपपद्यते इति प्राणशब्देनाप उच्यन्ते इति पूर्वपक्षः । " आपोमयः प्राणः " इत्यम्मयत्वात्प्राणस्य प्राणशब्देनापो वक्तुम् युज्यन्ते ॥ राद्धान्तस्तु—" अन्नमयं हि सोम्य मनः आपोमयः प्राणः " इति मनःप्राणयोर्न तत्तत्प्रकृतित्वमुच्यते । अपि तु तदाप्यायनम् । आहङ्कारिकत्वान्मनसः प्राणस्य चाकाशप्रकृतित्वात् । अतो " वाङ्मनसि " इतिवदुत्तरात् " मनः प्राणे " इति शब्दात्तत्सर्वेन्द्रिययुक्तं मनः प्राणे संयुज्यते ॥

(अध्यक्षाधिकरणम्)

सोऽध्यक्षे तदुपगमादिभ्यः ॥ ४ ॥

स प्राणः किं तेजसि संयुज्यते उत जीव इति संशयः ॥ "प्राणस्तेजसि" इति वचनात् तेजस्येवेति पूर्वपक्षः ॥ राद्धान्तस्तु—उत्क्रान्तौ प्राणस्य जीवोपगमादिश्रुतेः प्राणः करणाध्यक्षे जीवे संयुज्यते । एतदविरोधाय जीवे संयुज्य पश्चात्तेजःसंयोगं " प्राणस्तेजसि " इति वदति । श्रूयन्ते हि प्राणस्य जीवोपगमादयः "एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभिसमायन्ति । तमुत्क्रामन्तं प्राणोऽनूत्क्रामति । कस्मिन्नु वा प्रतिष्ठिते प्रतिष्ठास्यामि " इत्यादिषु ॥

(भू [illegible] रणम्)

भतेष [illegible] ुतेः ॥ ५ ॥

नैकस्मिन्दर्शयतो हि ॥ ६ ॥

" प्राणस्तेजसि " इति किं तेजोमात्रे प्राणः संयुज्यते उत भूतान्तरसंसृष्ट इति संशयः ॥ " तेजसि " इति वचनात्तेजोमात्र इति पूर्वपक्षः ॥ "पृथिवीमयः" इत्यादिना सञ्चरतो जीवस्य सर्वभूतमयत्वश्रुतेः त्रिवृत्करणश्रुतिस्मृतिभ्यां च तेजस एकस्य कार्याक्षमत्वात् भूतान्तरसंसृष्ट इति राद्धान्तः ॥ सूत्रद्वयं च व्याख्यातम् ॥

(आसृत्युपक्रमाधिकरणम्)

समाना चा सृत्युपक्रमादमृतत्वं चानुपोष्य ॥ ७ ॥

इयमुत्क्रान्तिः किं विद्वदविदुषोः समाना उताविदुष एवेति संशयः ॥ विदुषोऽत्रैवामृतत्वप्राप्तिश्रुतेरविदुष एवेति पूर्वपक्षः । श्रूयते हि विदुषोऽत्रैव ब्रह्मप्राप्तिः " यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि स्थिताः, अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते " इति ॥ राद्धान्तस्तु—विदुषोऽर्चिरादिकयैव ब्रह्मप्राप्तिः । अर्चिरादिगत्युपक्रमात्प्रागियमुत्क्रान्तिर्विद्वदविदुषोः समाना । गतिश्च मूर्द्धन्यनाड्या " शतं चैका च हृदयस्य नाड्यस्तासां मूर्द्धानमभिनिःसृतैका, तयोर्द्ध्वमायन्नमृतत्वमेति " इति श्रुतेः । " यदा सर्वे प्रमुच्यन्ते " इत्यनेन गतिश्रुत्यविरोधायामृतत्वसाधनभूतोपासननिष्पत्तिरुच्यते । हृदि स्थिताः कामा यदा प्रमुच्यन्ते तदैवोपासनारम्भान्मर्त्योऽमृतो भवति । अत्र कामविमोकपूर्वोपासनेऽवस्थितो मर्त्योऽर्चिरादिकया गत्या ब्रह्म समश्नुते इत्यर्थः ॥ सूत्रार्थः—सृतिः गतिः आ गत्युपक्रमात् उत्क्रान्तिर्विदुषोऽपि समाना । विदुषोऽर्चिरादिगतिश्रुतेः । " अथ मर्त्योऽमृतो भवति " इत्युच्यमानममृतत्वं अनुपोष्य च अदग्ध्वैव शरीरेन्द्रियादिसम्बन्धम् । उपासनारम्भपरिकररूपमित्यर्थः ॥

तदापीतेः(१) संसारव्यपदेशात् ॥ ८ ॥

तदमृतत्वमुक्तप्रकारमेव। कुतः। आपीतेः संसारव्यपदेशात्। अपीतिः ब्रह्मप्राप्तिः। अर्चिरादिकया गत्या देशविशेषं गत्वा यावद्ब्रह्म प्राप्यते तावत्संसारः शरीरसम्बन्धो हि व्यपदिश्यते॥ गतिव्यपदेशादेव शरीरादुत्क्रान्तस्य कथं शरीरसम्बन्ध इत्याह—

सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥ ९ ॥

सूक्ष्मशरीरमनुवर्तते। गतिव्यपदेशात्। न केवलं गतिव्यपदेशादेव। प्रमाणान्तरतस्तथा सूक्ष्मशरीरवत्त्वोपलब्धेश्च। विदुषोऽर्चिरादिकया गत्या गच्छतश्चन्द्रमसा संवादो हि व्यपदिश्यते "तं प्रतिब्रूयात्सत्यं ब्रूयात्" इत्यादिना॥

नोपमर्देनातः ॥ १० ॥

अत उक्ताद्धेतुकलापात् "अथ मर्त्योऽमृतो भवति" इति वचनं न देहसम्बन्धोपमर्देनामृतत्वं वदति। अपि तु उक्तमेवोपासनारम्भं वदतीत्यर्थः॥

अस्यैव चोपपत्तेरूष्मा ॥ ११ ॥

अस्य सूक्ष्मशरीरस्य विद्यमानत्वोपपत्तेश्च न देहसम्बन्धोपमर्देन। उपलभ्यते ह्युत्क्रामतो विदुषः क्वचिदूष्मा सूक्ष्मदेहगुणः। न च स्थूलदेहगुणः। अन्यत्रानुपलब्धेः। अतो विद्वान्सूक्ष्मशरीरेणोत्क्रामति॥

प्रतिषेधादिति चेन्न शारीरात्स्पष्टो ह्येकेषाम् ॥ १२ ॥

"स एतास्तेजोमात्राः" इत्यारभ्य "इति तु कामयमानः"

१ तत् आ अपीतेः इतिच्छेदः।

इत्यन्तेनाविदुष उत्क्रान्तिप्रकारं लोकान्तरगमनं पुनरावृत्तिं चाभिधाय "अथाकामयमानः" इत्यादिना "न तस्य प्राणा उत्क्रामन्ति ब्रह्मैव सन् ब्रह्माप्येति" इति विदुष उत्क्रान्तिप्रतिषेधात् उक्तप्रकारो नोपपद्यत इति चेन्न। शारीरात्प्राणानामविश्लेषोऽनेनोच्यते। तस्याकामयमानस्य विदुषः शारीरस्य प्राणाः स्वस्मान्नोत्क्रामन्ति। देवयानेन गमानात्महैव तिष्ठन्ति । अयमर्थः स्पष्टो ह्येकेषाम् माध्यन्दिनशाखिनां पाठे "योऽकामो निष्काम आप्तकाम आत्मकामो न तस्मात्प्राणा उत्क्रामन्ति" इति ॥

स्मर्यते च ॥ १३ ॥

स्मर्यते च विदुषो मूर्द्धन्यनाड्योत्क्रान्तिः—
"ऊर्द्धमेकः स्थितस्तेषां यो भित्त्वा सूर्यमण्डलम् ।
ब्रह्मलोकमतिक्रम्य तेन याति परां गतिम् ॥" इति ॥

(परसंपत्त्यधिकरणम्)

तानि परे तथा ह्याह ॥ १४ ॥

"प्राणास्तेजसि" इति तेजः शब्दनिर्दिष्टानि भूतानि जीवपरिष्वक्तानि किं परस्यां देवतायां संपद्यन्त उत यथाकर्म यथाविद्यं गच्छन्तीति संशयः ॥ तदानीं सुखदुःखभोगाद्यभावेन संपत्तिप्रयोजनाभावात् यथाकर्म यथाविद्यमिति पूर्वपक्षः । सर्वस्य परदेवताकायत्वेन तदात्मकत्वात् गन्तव्यस्थानमिदं "परस्यां देवतायाम्" इत्युच्यते ॥ राद्धान्तस्तु—तानि परस्मिन् ब्रह्मणि संपद्यन्ते । "तेजः परस्यां देवतायाम्" इति ह्याह। यथाश्रुतिविश्रमस्थानत्वेन कार्यं परिकल्प्यमित्यर्थः ॥ सूत्रं च व्याख्यातम् ॥

(अविभागाधिकरणम्)

अविभागो वचनात् ॥ १५ ॥

सेयं परमात्मनि संपत्तिः किं प्राकृतप्रलयवत् कारणापत्तिरूपा उत मनःप्रभृतिसंपत्तिवत् अविश्लेषमात्रमिति संशयः ॥ परमात्मनः कारणतया तत्संपत्तिवचनाच्च कारणापत्तिरेवेति पूर्वः पक्षः ॥ राद्धान्तस्तु—"वाङ्मनसि संपद्यते" इति श्रुतस्यैव संपत्तिपदस्य सर्वत्रानुषङ्गात् अनेकत्रानुषक्तस्याभिधानवैरूप्ये प्रमाणाभावादत्राप्यविभागः अविश्लेष एवोच्यते ॥ सूत्रं च व्याख्यातम् ।

(तदोकोऽधिकरणम्)

तदोकोऽग्रज्वलं तत्प्रकाशितद्वारो विद्यासामर्थ्या-त्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥ १६ ॥

"शतं चैका च हृदयस्य नाड्यस्तासां मूर्द्धानमभिनिःसृतैका, तयोर्द्धमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति" इति शताधिकया मूर्द्धन्यनाड्यां विदुषो गमनमिति नियमः सम्भवति नेति संशयः ॥ नाडीनामतिसूक्ष्मत्वेन दुर्वचत्वान्नियमो न सम्भवति, इति यादृच्छिकीं तथागतिमनुवदतीदं वचनमिति पूर्वपक्षः ॥ राद्धान्तस्तु—परमपुरुषाराधनभूतया विद्यया तदङ्गभूतगतिचिन्तनेन च प्रीतेन परमपुरुषेणानुग्रहीतो जीवः तत्प्रकाशितद्वारस्तयैव मूर्द्धन्यानाड्या गच्छति ॥ सूत्रार्थः—हार्दपरमपुरुषाराधनविद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च प्रीतहार्दानुग्रहीतो भवति ततस्तदोको जीवस्य स्थानं हृदयमग्र-

ज्वलनं प्रकाशिताग्रं भवति। एवं परमपुरुषप्रकाशितद्वारः शताधिकया गच्छति। "तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः। सर्वस्य चाहं हृदि सन्निविष्टः" इति हार्दः परमात्मा॥

(रश्म्यनुसाराधिकरणम्)

रश्म्यनुसारी ॥ १७ ॥

"अथ यत्रैतस्माच्छरीरादुत्क्रामतीत्यथैतैरेव रश्मिभिरूर्द्ध्वमाक्रमते" इति विद्वान् रश्म्यनुसारी गच्छतीति नियमः सम्भवति नेति संशयः॥ निशि मृतस्य विदुषः आदित्यरश्म्यनुसारासम्भवादनियम इति पूर्वपक्षः। वचनं तु पक्षप्राप्तमनुवदति॥ राद्धान्तस्तु—पक्षप्राप्त्यनुवादे "अथैतैरेव" इत्यवधारणविरोधः। न च निशि रश्मयो न सम्भवंतीति। संत्येव। निश्यपि निदाघसमये ऊष्मोपलब्धेः सूक्ष्माः संत्येवेति रश्म्यनुसार्येव गच्छति। हेमंतेऽनुपलब्धिर्दुर्दिनवद्धिमाभिभवात्॥

(निशाधिकरणम्)

निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वाद्दर्शयति च ॥ १८ ॥

विदुषो निशि मृतस्य ब्रह्मप्राप्तिरस्ति नेति संशयः॥
"दिवा च शुक्लपक्षश्च उत्तरायणमेव च।
मुमूर्षतां प्रशस्तानि विपरीतं तु गर्हितम्"॥

इति निशामरणस्य गर्हितत्वेनाधोगतिहेतुत्वान्न ब्रह्मप्राप्तिः सम्भवतीति पूर्वपक्षः॥ राद्धान्तस्तु—विद्यामाहात्म्यादुत्तरपूर्वाघयोरश्लेषविनाशश्रुतेः प्रारब्धस्यापि कर्मणश्चरमदेहावधित्वाद्बन्धहेत्वभावान्निशि मृतस्यापि ब्रह्मप्रा-

प्तिरस्त्येवेति । अविद्वद्विषया निशामरणनिन्दा ॥ सूत्रार्थः–निशि मृतस्य न ब्रह्मप्राप्तिरिति चेन्न । सम्बन्धस्य यावद्देहभावित्वात् । अनारब्धकार्यकर्मसम्बन्धस्य विद्यया विनष्टत्वात् । आरब्धकार्यकर्मसम्बन्धस्यापि यावच्चरमदेहभावित्वात्सम्बन्धहेत्वभावेन ब्रह्मप्राप्तिरस्त्येवेत्यर्थः । तदेतत् श्रुतिरेव दर्शयति "तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये" इति ॥

(दक्षिणायनाधिकरणम्)

अतश्चायनेऽपि दक्षिणे ॥ १९ ॥

दक्षिणायने मृतस्य विदुषो ब्रह्मप्राप्तिरस्ति नेति संशयः ॥ "अथ यो दक्षिणे प्रमीयते पितॄणामेव महिमानङ्गत्वा चन्द्रमसः सायुज्यं गच्छति" इति विदुषो दक्षिणायने मृतस्य चन्द्रसायुज्यश्रवणात् चन्द्रं प्राप्तनां "अथैतमेवाध्वानं पुनर्निवर्तन्ते" इति वचनाच्च दक्षिणायने मृतस्य ब्रह्मप्राप्तिर्न संभवतीति पूर्वः पक्षः ॥ राद्धान्तस्तु—पूर्वोक्ताद्बन्धहेत्वभावाद्विदुषश्चन्द्रं प्राप्तस्यापि पुनरावृत्तिर्न संभवति । चन्द्रसायुज्यवचनं विदुषो ब्रह्मप्रेप्सोर्विश्रामस्थानमात्रविषयम् । आवृत्तिवचनं त्वविदुषामेव ॥ सूत्रार्थः–यतो हेतोर्निशि मृतस्य ब्रह्मप्राप्तिः । तत एव बन्धहेत्वभावाद्दक्षिणायने मृतस्यापि ब्रह्मप्राप्तिरस्त्येव ॥

" यत्र काले त्वनावृत्तिमावृत्तिं चैव योगिनः " इति मरणकालविषयं स्मर्यते इति चेत्तत्राह—

योगिनः प्रति स्मर्येते स्मार्ते चैते ॥ २० ॥

योगिनो ब्रह्मनिनिष्ठान् प्रत्येते देवयानपितृयानगती स्मार्ते स्मृतिविषयभूते अहरहः स्मर्तव्ये स्मर्येते इत्यर्थः । " यत्र

काले त्वानावृत्तिमावृत्तिं चैव योगिनः ” इत्यादिना

“ नैते सृतीपार्थ जानन् योगी मुह्यति कश्चन ।
तस्मात्सर्वेषु कालेषु योगयुक्तो भवार्जुन ” ॥

इत्यन्तेन मुमूर्षून्प्रति कालविशेषोपादानं स्मर्यते। आतिवाहिकगणस्य कालभिमानिदेवताभूयस्त्वेन यत्र काल इत्युच्यते॥

इति श्रीभगवद्रामानुजविरचिते वेदन्तदीपे चतुर्थाध्यायस्य द्वितीयः पादः ।

(अर्चिराद्यधिकरणम)

अर्चिरादिना तत्प्रथितेः ॥ १ ॥

किं विद्वानर्चिरादिना एकेन मार्गेण गच्छति उत तेन वान्यैर्वेति संशयः ॥ तदर्थं परीक्ष्यते सर्वासु श्रुतिषु अर्चिरादिरेक एव मार्ग आम्नायते उत तत्र तत्रान्य इति । यदि अर्चिरादिरेक एव सर्वत्र तदैकेनैव गच्छति । यदि तत्र तत्रान्यः तदा तैर्वाऽन्येन वा ॥ छान्दोग्यवाजसनेयकादिषु नानाविधा गतिप्रकाराः श्रूयन्ते । तेषां ब्रह्मप्राप्तौ नैरपेक्ष्यश्रवणात्तैर्वाऽर्चिरादिना वेति विकल्प इति पूर्वः पक्षः ॥ राद्धान्तस्तु—सर्वत्रार्चिराद्यन्तर्भूतादित्यादीनां दर्शनात् स एवेति प्रत्यभिज्ञानात् अन्यत्रोक्तानामन्यत्रोपसंहाराच्च सर्वत्रार्चिरादिरेक एव मार्ग इति तेनैव गच्छति विद्वान् ॥ सूत्रार्थः—अर्चिरादिनैव गच्छति । कुतः । तत्प्रथितेः । प्रथितिः प्रसिद्धिः । सर्वत्र तत्प्रत्यभिज्ञानादित्यर्थः ॥

(वाय्वधिकरणम)

वायुमब्दादविशेषविशेषाभ्याम् ॥ २ ॥

" तेऽर्चिषमभिसम्भवंत्यर्चिषोऽहरह्नः" इत्यारभ्य "मासेभ्यः संवत्सरं संवत्सरादादित्यं " इति छान्दोग्ये श्रुतम् । तत्र संवत्सरादित्ययोर्मध्ये देवलोको वायुश्च श्रुतौ श्रुत्यन्तरे । द्वयोः प्रकरणयोः किं देवलोको वायुश्चार्थान्तरभूतावुत वायुरेक एवेति संशयः ॥ शब्दभेदादर्थान्तरभूताविति पूर्वपक्षः । अर्थान्तरत्वे सति "देवलोकादादित्यम्" इति देवलोकस्य च "तेन स ऊर्ध्वमाक्रमते स आदित्यम्" इति वायोश्च आदित्यात्पूर्वत्वेन श्रौतक्रमनिर्दिष्टत्वाद्देवलोको वायुश्च यथेष्टक्रमेण निवेशयितव्यौ ॥ राद्धान्तस्तु—वायुरेव देवलोकशब्दनिर्दिष्ट इति न तस्मादन्यः । देवानां लोक इति हि देवलोकः । देवानां वासस्थानं देवलोकशब्देनाविशेषेण निर्दिष्टम् । "योऽयं पवत एष एव देवानां गृहाः" इति वायोर्देवानां वासस्थानत्वेन श्रुतत्वादविशेषनिर्दिष्टो देवलोको वायुरेवेति निश्चीयते इति संवत्सरादूर्ध्वं वायुर्वायोरादित्य इति क्रमश्च स्यात् ॥ सूत्रार्थः—अब्दात्संवत्सरादूर्ध्वमादित्यात् पूर्वं वायुमेव निवेशयेत् । देवलोकवायुशब्दाभ्यामविशेषविशेषाभ्यां वायोरेकस्यैव निर्दिष्टत्वात् । देवानां वासस्थानमिसविशेषेण हि देवलोकशब्दो वायुं देवानां वासस्थानमभिदधाति, वायुशब्दस्तमेव विशेषेणाति द्वयोः प्रकरणद्वयविहितयोरेकत्वादित्युक्तं भवति ॥

(वरुणाधिकरणम्)

तडितोऽधि वरुणः सम्बन्धात् ॥ ३ ॥

छान्दोग्यवाजसनेयककौषीतकिप्रभृतिष्वाम्नातस्यार्चिरादिमार्गस्यार्चिरहरापूर्यमाणपक्षोत्तरायणसंवत्सरवाय्वादित्यचन्द्रविद्युद्वरुणेन्द्रप्रजापतिरूपस्योपसंहारे वायुपर्यन्तस्य श्रुसा-

दिभिः क्रमप्रकार उक्तः । वरुणेन्द्रप्रजापतीनां किं विद्युत उपरि निवेशः उत वायोरुपरीति संशयः ॥ "स वायुलोकं स वरुणलोकम्" इति कौषीतकीपाठक्रमेण वायोरुपरि वरुणस्य निवेशः । इन्द्रादेरपि वरुणनिवेशाय वाय्वादित्ययोः क्रमस्य वाधितत्वात्तत्रैव वरुणोपरीति पूर्वपक्षः ॥ राद्धान्तस्तु—विद्युतो मेघोदरवर्तित्वेन विद्युद्वरुणयोर्लोके वेदे च सम्बन्धावगमात् पाठक्रमादर्थक्रमस्य बलीयस्त्वेन वरुणस्य विद्युत उपरि निवेशः कार्यः । इन्द्रादेरपि वरुणनिवेशाय विद्युतो व्यवधानसहत्वदर्शनाद्वरुणोपरिनिवेशः ॥ सूत्रं च व्याख्यातम् ॥

(आतिवाहिकाधिकरणम्)

आतिवाहिकास्तल्लिङ्गात् ॥ ४ ॥

किमर्चिरादयो विदुषो ब्रह्मप्रेप्सोर्मार्गचिन्हभूता उत गमयितार इति संशयः ॥ अमुकवृक्षं गत्वा ततः पर्वतमित्यातिदेशिकोपदेशप्रकारदर्शनान्मार्गचिन्हभूता इति पूर्वपक्षः ॥ राद्धान्तस्तु—"स एनान् ब्रह्म गमयति" इति वैद्युतपुरुषस्य गमयितृत्वदर्शनादितरेषां चाविशेषनिर्दिष्टानां स एव सम्बन्ध इति निश्चीयते। "अग्निलोकम्" इत्यादिलोकशब्दोपि मध्ये भोगाभावात् गमयितृत्व एवोपपद्यते ॥ सूत्रार्थः—आतिवाहिकाः विदुषामतिवाहे परमपुरुषेण नियुक्ताः अर्चिराद्यभिमानिदेवताविशेषाः गमयितार इत्यर्थः । "स एनान् ब्रह्मगमयति" इति लिङ्गात् ॥

वैद्युतेनैव ततस्तच्छ्रुतेः ॥ ५ ॥

ततो विद्युतउपरिष्टात् वैद्युतेन विदुषो गमनम् । तच्छ्रुतेः "स एनान् ब्रह्मगमयति" इति तस्यैव श्रुतेः । वरुणादीनां तदनुग्रा-

हकत्वेन गमयितृत्वमिति निश्चीयते इत्यर्थः ॥

(कार्याधिकरणम्)

कार्यं बादरिरस्य गत्युपपत्तेः ॥ ६ ॥

किमर्चिरादिको गणः कार्यं हिरण्यगर्भमुपासीनान्नयति उत परं ब्रह्मोपासीनान् अथप्रत्यगात्मानं ब्रह्मात्मकत्तयोपासी नानितिसंशयः ॥ हिरण्यगर्भमुपासीनानिति पूर्वपक्षः । तेषामेव गत्युपपत्तेः । न हि परिपूर्णं सर्वगतं परं ब्रह्मोपासीनानां तत्प्राप्तये गतिरुपपद्यते नित्यप्राप्तत्वात् । अविद्यानिवृत्तिरेव हि तेषां कार्या ॥ परमेवोपासीनानित्यपरपक्षः । "स एनान् ब्रह्म गमयति" इति ब्रह्मशब्दस्य तत्रैव मुख्यत्वात् अविद्यानिवृत्तेः फलाभिसन्धिरहितयज्ञाद्यपेक्षावत् श्रवणाद्यपेक्षावच्च गतिश्रुत्यादेशविशेषापेक्षा च विद्यत इति निश्चीयते ॥ राद्धान्तस्तु—परमुपासीनानान्यनपि नयति। "तद्य इत्थंविदुर्ये चेमेऽरण्ये श्रद्धान्तप इत्युपासते तेऽर्चिषमभिसम्भवंति" इति पञ्चाग्निविदां परं ब्रह्मोपासीनानां चाभेदेनार्चिरादिगतिश्रुतेः। पञ्चाग्निविदो हि प्रकृतिवियुक्तब्रह्मात्मकात्मस्वरूपविदस्ते च ब्रह्मैव प्राप्य न निर्वर्तन्ते। परं ब्रह्मोपासीनास्तु यथावस्थितं परं ब्रह्म प्राप्य न पुनर्निवर्तन्ते। "तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धां तप इत्युपासते तेऽर्चिषमभिसम्भवंति" इति उभयविधानाद्भेदेनोपादायार्चिरादिगतिश्रुतेरपुनरावृत्तिश्रुतेश्चैवमिति निश्चीयते ॥ सूत्रार्थः—कार्यं हिरण्यगर्भमुपासीनमातिवाहिको गणो नयतीति बादरिराचार्यो मन्यते। अस्यैव गत्युपपत्तेः। परमुपासीनस्य हि न तत्प्राप्तये गतिरुपपद्यते। सर्वगतत्वात्परस्य ब्रह्मणः ॥

विशेषितत्वात् ॥ ७ ॥

"पुरुषोऽमानव एत्य ब्रह्मलोकान्गमयति" इति "प्रजापतेः सभां वेश्म प्रपद्ये" इति च प्राप्यस्थानस्य विशेषितत्वाच्च हिरण्यगर्भमुपासीनमेव नयति ॥

सामीप्यात्तु तद्व्यपदेशः ॥ ८ ॥

एवं निश्चिते सति "स एनान् ब्रह्म गमयति" इति हिरण्यगर्भस्य ब्रह्मव्यपदेशो ब्रह्मसामीप्यात्। "यो ब्रह्माणं विदधाति पूर्वम्" इति हि सामीप्यं विद्यते ॥

कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॥९॥

हिरण्यगर्भप्राप्तावपि अपुनरावृत्तिरुपपद्यते। कार्यस्य हिरण्यगर्भलोकस्यात्यये तदध्यक्षेण हिरण्यगर्भेणाधिकारिपुरुषेण विदुषा सह परप्राप्त्यभिधानात् "ते ब्रह्मलोके तु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे" इति ॥

स्मृतेश्च ॥ १० ॥

"ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसञ्चरे ।
परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्" ॥
इति स्मृतेश्चावगम्यते ॥

परं जैमिनिर्मुख्यत्वात् ॥ ११ ॥

परं ब्रह्मोपासीनमेव नयत्यातिवाहिकगण इति जैमिनिराचार्यो मन्यते। "ब्रह्म गमयति" इति ब्रह्मशब्दस्य तत्रैव मुख्यत्वात्। "ब्रह्मलोकान्" इति शब्दश्च ब्रह्मैव लोको ब्रह्मलोक इति कर्मधारयपरिग्रहस्यैव न्याय्यत्वादुपपद्यते। एवं निश्चिते बहुवचनं च "अदितिः पाशान्" इतिवदुपपन्नम् ॥

दर्शनाच्च ॥ १२ ॥

"अस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते" इत्यर्चिरादिना गतस्य परब्रह्मप्राप्तिं च दर्शयति ॥

न च कार्ये प्रत्यभिसन्धिः ॥ १३ ॥

" प्रजापतेः सभां वेश्म प्रपद्ये " इत्यभिसन्धिश्च न कार्ये । " धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसम्भवामि " इत्यकृतं ब्रह्मलोकमिति तत्रैव विशेषितत्वात् । "यशोऽहं भवामि ब्राह्मणानाम्" इति सर्वात्मभावाभिसन्धानाच्च ॥

अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च दोषात्तत्क्रतुश्च ॥ १४ ॥

कार्यमुपासीनानेवेति न पक्षः। परमेवोपासीनानिति चायमपि नियमो न सम्भवति। कुतः। उभयथा च दोषात् । कार्यमुपासीनानिति पक्षे " अस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते" इत्यादिकाः श्रुतयो "ये चेमेऽरण्ये श्रद्धा तप इत्युपासते इति च प्रकुप्येयुः परमेवेति नियमे "तद्य इत्थंविदुः" इति प्रकुप्येत् । तस्मादप्रतीकालंबनान्नयतीति भगवान् बादरायणो मन्यते। प्रतीकालंबनास्त्वचिन्मिश्रं केवलं वाचिद्वस्तु । सिंहो देवदत्त इतिवत् ब्रह्मदृष्ट्या स्वरूपेण वा तद्वस्तु य उपासते प्रतीकालम्बनास्तद्व्यतिरिक्ताः सर्वकारणं सत्यसङ्कल्पं निखिलहेयप्रत्यनीकानवधिकातिशयानन्दस्वरूपं ब्रह्म उपासते ये च प्रत्यगात्मनं भूतसूक्ष्मैः संपरिष्वक्तं सर्वत्र वर्त्तमानं भूतसूक्ष्मव्यतिरिक्तंज्ञानैकस्वरूपं नित्यं निर्विकारं

"य आत्मनि तिष्ठन्" इत्यादिनाऽवगतब्रह्मात्मभावं पञ्चाग्नि-विद्योदितमुपासते तान् उभयविधान्नयति । "तद्य इत्थं विदुर्ये चेमेऽरण्ये" इत्युभयश्रुतेः । तत्क्रतुश्च "यथा क्रतुरस्मिल्लोके पुरुषो भवति तथेतः प्रेत्य भवति" इत्युभयेषामेवापुनरावृत्तिः सम्भवति । अचिन्मिश्रं केवलमचिद्वस्तु चोपसीनानां तत्-क्रतुन्यायेनैव पुनरावृत्तिरवर्जनीया ॥

विशेषं च दर्शयति ॥ १५ ॥

प्रतीकाद्युक्तलक्षणमचिन्मिश्रं केवलमचिद्वस्तु चोपासी-नानां सर्वेषां गत्यनपेक्षं परमितफलविशेषं च दर्शयति श्रुतिः "यावन्नाम्नो गतं तत्रास्य यथा कामचारो भवति" इत्यादिका । अतः "ब्रह्मणा सह ते सर्वे" इति वचनं नार्चिरा-दिना गतानां गतिप्रकारविषयम् । अर्चिरादिना गतानां देहाव-सानसमय एव सुकृतदुष्कृतयोर्नाशाद्धिरण्यगर्भलोकप्राप्तित-द्वासतत्रस्थभोगानुभवहेत्वभावात्तत्क्रतुन्यायविरोधात्तदानीमेव ब्रह्मप्राप्तिश्रुतिविरोधाच्च । तद्वचनं तु पुण्यकर्मविशेषेण हि-रण्यगर्भलोकं प्राप्तानां "तदुपर्यपि बादरायणः" इति न्यायेन तत्रैव निष्पन्नविद्यानां गतिप्रकारविषयम् । "ते ब्रह्मलोके" इति तु ब्रह्मलोकशब्दस्य कर्मधारयवृत्त्या ब्रह्मविषयत्वात् ब्रह्मण्युपास्ये वर्तमानाः परान्तकाले चरमदेहावसानसमये परामृतात् परस्माद्ब्रह्मणः उपासनप्रीताद्धतोः परिमुच्यन्ति स-र्वेऽस्माद्बन्धाद्विमुच्यन्त इति "वेदान्तविज्ञानसुनिश्चितार्थाः" इति प्रकरणादवगम्यते "तद्य इत्थं विदुः" इति पञ्चाग्निविदो ब्रह्म-प्राप्त्यपुनरावृत्तिश्रवणात्तत्क्रतुन्यायेनाचिद्वियुक्तब्रह्मात्मकात्म-स्वरूपोपासनं विवक्षितमिति निश्चीयते । तथैव तत्र श्रुतिरपि

"इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" इति "रमणीयचरणाः" इति च कर्महेतुकमनुष्यादिभावो ऽपामेव भूतान्तरसंसृष्टानामिति चिदचिद्विवेकं प्रतिपाद्य "तद्य इत्थं विदुः" इति भूतसूक्ष्मव्यतिरिक्तात्मस्वरूपोपासनमेव विदधाति ॥

इति श्रीभगवद्रामानुजविरचिते वेदान्तदीपे
चतुर्थाध्यायस्य तृतीयः पादः ।

(संपद्याविर्भावाधिकरणम्)

संपद्याविर्भावः स्वेनशब्दात् ॥ १ ॥

"एवमेवैष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते" इति किं परं ज्योतिरुपसंपन्नस्य प्रत्यगात्मानः स्वरूपाविर्भावः प्रतिपाद्यते उत अन्येन साध्येन रूपेण सम्बन्ध इति संशयः ॥ स्वस्वरूपस्य सुषुप्त्यादौ निरानन्दत्वदर्शनात्स्वरूपमात्रस्य नित्याविर्भूतत्वाच्च साध्येन सुखैकन्तेन रूपेण संबध्यते, एवं चाभिनिष्पद्यते इति सङ्गच्छते, परं ज्योतिरुपसंपन्नस्य ह्यानन्दित्वं श्रूयते "रसो वै सः, रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति। स एको ब्राह्मण आनन्दः श्रोत्रियस्य चाकामहतस्य" इत्यादिषु, अतः साध्येन रूपेणेति पूर्वः पक्षः ॥ राद्धान्तस्तु—"स्वेन रूपेणाभिनिष्पद्यते" इति विशेषणात्स्वरूपाविर्भाव एव । स्वरूपस्य चापहतपाप्मत्वादिगुणकतया प्रजापतिवाक्योदितस्य कर्मकृतदेहसम्बन्धतिरोहितस्य परं ज्योतिरुपसंपत्त्या सूक्ष्मासूक्ष्मदेहविनिर्मुक्तस्यासंकुचितज्ञानादिगुणकस्वरूपाविर्भावात्स्वयाथात्म्यानुभवपूर्वकानवधिकातिशयानन्दब्रह्मानुभवः संपत्स्यत इति चोपपन्नतरम् ॥ सूत्रार्थः—परं ज्योतिरुपसंपद्य स्वस्व-

रूपाविर्भावः प्रतिपाद्यते । कुतः । स्वेनशब्दात् साध्यस्यापि रूपस्य स्वासाधारणत्वेन स्वेनेति विशेषणं ह्यनर्थकम् ॥

स्वरूपमात्रस्याहं जानामीति नित्याविर्भूतत्वेन "परं ज्योतिरुपसंपद्य" इत्यनर्थकमित्याशङ्क्याह—

मुक्तः प्रतिज्ञानात् ॥ २ ॥

कर्मसम्बन्धतत्कृतदेहादेर्मुक्तस्वरूपमत्र "स्वेन रूपेणाभिनिष्पद्यते" इत्युच्यते । कथमिदमवगम्यते "एतं त्वेव ते भूयोऽनुव्याख्यास्यामि" इति कर्महेतुकदेहसम्बन्धतत्कृतजागरिताद्यवस्थाविनिर्मुक्तस्वरूपस्यात्र वक्तव्यतया प्रतिज्ञानात् ॥

एवमपि स्वरूपमात्राविर्भावस्य पुरुषार्थत्वं न सिध्यतीत्याशङ्क्याह—

आत्मा प्रकरणात् ॥ ३ ॥

देहादिविनिर्मुक्तः स्वरूपेणावस्थित आत्मा अपहतपाप्मत्वादिसत्यसंकल्पत्वपर्यन्तगुणकः । तस्य ह्याविर्भाव उच्यते । कुतः । प्रकरणात् "य आत्माऽपहतपाप्मा" इति प्रकृत्य "एतं त्वेव ते भूयोऽनुव्याख्यास्यामि" इत्यादिनोच्यते । अतोऽपहतपाप्मत्वादिगुणकस्य कर्माख्याविद्यातिरोहितस्य परं ज्योतिरुपसंपद्य निवृत्ततिरोधानस्य आविर्भावः प्रतिपाद्यते ॥

(अविभागेन दृष्टत्वाधिकरणम्)

अविभागेन दृष्टत्वात् ॥ ४ ॥

किमयं मुक्त आविर्भूतस्वरूपः प्रत्यगात्मा परं ब्रह्म स्वात्मनो विभक्तमनुभवति उत स्वात्मनोऽप्यात्मतयाऽविभागेनाहं ब्रह्मास्मीति संशयः ॥ "निरञ्जनः परमं साम्यमुपैति । सोऽश्नुते

सर्वान् कामान् सह ब्रह्मणा विपश्चिता । इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः" इति श्रुतिस्मृतिभ्यो विभक्तं मुक्तात्माऽनुभवतीति पूर्वपक्षः॥ राद्धान्तस्तु—"सर्वं खल्विदं ब्रह्म । ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि" इत्यादिसामानाधिकरण्येन "यः पृथिव्यां तिष्ठन्—यस्य पृथिवी शरीरम् । य आत्मनि तिष्ठन् यस्यात्मा शरीरम्" इत्यादिषु सर्वस्य चिदचिद्वस्तुनो ब्रह्मशरीरतया ब्रह्मप्रकारतया तत्तद्बुद्धिशब्दास्तत्पर्यन्तविषया इत्यवगम्य "आत्मेति तूपगच्छन्ति" इति न्यायेन स्वात्मनोऽप्यात्मतया अहं ब्रह्मास्मीत्युपासनेन यथावस्थितपरमात्मात्मकस्वात्मनो दृष्टत्वान्मुक्तः स्वात्मनोऽपि आत्मभूतं ब्रह्माहं ब्रह्मास्मीति अविभागेनैवानुभवति ॥ सूत्रार्थः—अहं ब्रह्माऽऽस्मीति अविभागेन ब्रह्मानुभवति मुक्तः । स्वात्मनोऽप्यात्मतया उपासने यथावस्थितपरमात्मात्मकस्वरूपस्य दृष्टत्वात् । साधर्म्यश्रुतिस्तु परमात्मशरीरभूतस्य प्रत्यगात्मनोऽपहतपाप्मत्वादिगुणैस्तत्साधर्म्यं प्रतिपादयति।"सोऽश्नुते सर्वान्कामान्सह ब्रह्मणा विपश्चिता" इति ब्रह्मशरीरतया ब्रह्मप्रकारभूतत्वात्स्वात्मभूतेन ब्रह्मणा सह तद्गुणाननुभवतीति वदति । काम्यन्ते इति कामाः । कल्याणगुणाः । सर्वकल्याणगुणविशिष्टं ब्रह्मानुभवतीत्यर्थः ॥

(ब्राह्माधिकरणम्)

ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥ ५ ॥

किं जीवस्य स्वाभाविकं रूपमपहतपाप्मत्वादिगुणकम् उत चैतन्यमात्रम् उत उभयमिति संशयः ॥ अपहतपाप्मत्वादिगुणकमिति प्रथमः पक्षः ॥ "य आत्माऽपहतपाप्मा" इति प्रतिपादनात् चैतन्यमात्रमिति द्वितीयः पक्षः । "एवं वा अरेऽयमात्माऽनंतरो बाह्यः कृत्स्नः प्रज्ञानघन एव । विज्ञानघन एव" इत्यवधारणात् ॥

राद्धान्तस्तु—विज्ञानस्वरूपस्यैवापहतपाप्मत्वादिगुणकत्वप्रतिपादनादविरोधाद्वोभयस्वरूपम् । न च "विज्ञानघन एव" इत्यवधारणं गुणान्तरासहम् । यथा सैन्धवघनस्य रसघन एवेत्यवधारणेऽपि रसाश्रयद्रव्यं रूपस्पर्शादिगुणान्तरं च सहते रसघन एवेत्यवधारणं तु रसवद्द्रव्यान्तरस्वभावव्यावृत्तिपरं द्रव्यान्तराणां हि स्वस्यैकदेशे रसवत्त्वं सैन्धवघनस्य तु सर्वत्र, एवमत्रापि जडवस्तुव्यावृत्त्या संवित्स्वभावस्य सगुणस्यात्मनः स्वप्रकाशतावधारणं क्रियते "विज्ञानघन एव" इति ॥ सूत्रार्थः—ब्राह्मेणापहतपाप्मत्वादिनाऽस्य स्वरूपाविर्भावः । अपहतपाप्मत्वादयो दहरवाक्ये ब्रह्मगुणाः श्रुताः । उपन्यासादिभ्यः । तेषां ब्रह्मगुणानां प्रत्यगात्मन्यप्यपि "य आत्माऽपहतपा" इत्युपन्यासात् । आदिशब्दात् "जक्षत् क्रीडन् रममाणः" इत्यादिभ्योऽपि सत्यसङ्कल्पादयोऽवगम्यंत इति जैमिनिराचार्यो मन्यते ॥

चिति तन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ॥ ६ ॥

चैतन्यमात्रेण स्वरूपाविर्भावः । "विज्ञानघन एव" इति तदात्मकत्वावधारणादित्यौडुलोमिराचार्यो मन्यते ॥

एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ॥ ७ ॥

एवं विज्ञानस्वरूपस्यैव सर्वेषामपहतपाप्मत्वादिसत्यसङ्कल्पत्वपर्यन्तानामपि "य आत्माऽपहतपाप्मा" इत्युपन्यासात् सद्भावावगमादुभयोरविरोधं भगवान्बादरायणो मन्यते । उभयश्रुत्यवगतस्येतरेतरविरोधाभावान्नान्यतरबाधे प्रमाणमस्तीत्यभिप्रायः ॥

(संकल्पाधिकरणम्)

सङ्कल्पादेव च तच्छ्रुतेः ॥ ८ ॥

"परं ज्योतिरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः स तत्र पर्येति जक्षत् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा" इत्याम्नायते। किं ते ज्ञात्यादयो मुक्तस्य सङ्कल्पादेव भवन्ति उत प्रयत्नान्तरसव्यपेक्षात्सङ्कल्पादिति संशयः ॥ लोके राज्ञां सत्यसंकल्पानामपि प्रयत्नान्तरसापेक्षत्वदर्शनात् तत्सापेक्षादिति पूर्वः पक्षः। "संकल्पादेव" इत्यवधारणं "विज्ञानघन एव" इतिवद्भविष्यति ॥ राद्धान्तस्तु—"संकल्पादेवास्य पितरः समुत्तिष्ठन्ति" इत्यवधारणान्नान्यापेक्षत्वम्। न चेह सत्यकमत्वाद्युपन्यासवन्मुक्तस्यान्यापेक्षत्वे प्रमाणमस्ति। लोके सत्यसंकल्पत्वाभावादेव प्रयत्नान्तरापेक्षत्वम्। न हि परमपुरुषव्यतिरिक्तः कश्चित्सत्यसंकल्पोऽस्ति । मुक्तश्च तत्प्रसादात् तत्साम्यमुपागतस्तथैव ॥ सूत्रमपि व्याख्यातम् ॥

अत एव चानन्याधिपतिः ॥ ९ ॥

अतः श्रुतेरेव मुक्तोऽनन्याधिपतिश्च । अन्याधिपतित्वं कर्माधीनत्वम्। "अपहतपाप्मा सत्यसंकल्पः" इति हि श्रूयते। अतो मुक्तो नान्याधिपतिः ॥

(अभावाधिकरणम्)

अभावं बादरिराह ह्येवम् ॥ १० ॥

किं मुक्तस्य शरीरेन्द्रियाद्यस्ति उत न अथवा यथासंकल्पं अस्ति न वेति संशयः ॥ "न ह वै शरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति अशरीरं वाव सन्तं न प्रियाप्रिये स्पृशतः" इति मुक्तस्याशरीरत्वश्रवणात् नास्त्येवेत्येकः पक्षः ॥ "स एकधा

भवति त्रिधा भवति" इति सशरीरत्वश्रुतेः अशरीरत्वश्रुतिः कर्मगृहीतशरीरविषयेति शरीरेन्द्रियाद्यस्त्येवेति द्वितीयः पक्षः ॥ राद्धान्तस्तु—"मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोके" इति अशरीरस्यैव भोगश्रुतेः "स एकधा भवति" इति श्रुतेश्च यथासंकल्पमस्ति न वेति ॥ सूत्रार्थः—शरीराभावं बादरिर्मेने । एवमाह हि श्रुतिः "अशरीरं वाव संतम्" इति ॥

भावं जैमिनिर्विकल्पामननात् ॥ ११ ॥

शरीरादिभावं जैमिनिर्मेने । कुतः । विकल्पामननात् । विविधः कल्पो विकल्पः । "स एकधा भवति त्रिधा भवति" इत्यादिना मुक्तस्य हि विविधः कल्प आम्नायते । आत्मन एकरूपस्याच्छेद्यस्य वैविध्यासम्भवाच्छरीरद्वारेण हि वैविध्यं ज्ञायते ॥

द्वादशाहवदुभयविधं बादरायणोऽतः ॥ १२ ॥

अत उभयश्रुतेरिच्छात उभयविधं शरीरवत्त्वं अशरीरत्वं च भगवान्बादरायणो मेने । द्वादशाहवत् । यथा द्वादशाह उभयश्रुतेः सत्रमहीनं च । "द्वादशाहमृद्धिकामा उपेयुः" इति सत्रं "द्वादशाहेन प्रजाकामं याजयेत्" इत्यहीनम्(१) ॥

तन्वभावे संध्यवदुपपत्तेः ॥ १३ ॥

स्वेनैव सृष्टतनुप्रभृत्युपकरणाभावे परमपुरुषसृष्टैरुपकरणैर्भोगोपपत्तेः सत्यसङ्कल्पोऽपि स्वयं न सृजति । स्वप्नवत् । यथा स्वप्ने "अथ रथान्" इत्यारभ्य "स हि कर्ता"

---

(१) बहुयजमानको यागः सत्रम् । एकयजमानको यागोऽहीनम् । उपैतिविधिचोदितं सत्रम् । यजतिविधिचोदितमहीनम् इति विवेकः ॥

इति " य एषु सुप्तेषु " इत्यारभ्य " तदु नात्येति कश्च-न"इति चेश्वरसृष्टै रथाद्युपकरणैर्जीवो भुंक्ते तथा मुक्तोऽपि लीलाप्रवृत्तेनेश्वरेण सृष्टैः पितृलोकादिभिर्लीलारसं भुंक्ते ॥

भावे जाग्रद्वत् ॥ १४ ॥

स्वसङ्कल्पादेव सृष्टतनुप्रभृतिपितृलोकाद्युपकरणभावे जाग्रत्पुरुषवन्मुक्तो लीलारसं भुंक्ते । परमपुरुषोऽपि लीलार्थं दशरथवसुदेवादिकं स्वयमेव सृष्ट्वा तैर्मनुष्यधर्मलीलारसं भुंक्ते । तथा मुक्तश्च सत्यसङ्कल्पत्वात्परमपुरुषलीलान्तर्गतं स्वपितृलोकादिकं स्वयमेव सृष्ट्वा तैर्लीलारसमनुभवति ॥

ननु आत्माऽणुपरिमाण इत्युक्तं कथमनेकेषु शरीरेषु एकस्याणोरात्माभिमानसम्भव इत्यत्राह—

प्रदीपवदावेशस्तथा हि दर्शयति ॥ १५ ॥

यथा प्रदीपस्य एकस्य एकदेशवर्तिनः स्वया प्रभयाऽनेकदेशप्रवेशः तद्वदात्मनोऽपि एकदेशस्थस्य स्वप्रभारूपेण ज्ञानेन सर्वदेहेषु यथासङ्कल्पमात्माभिमानानुगुणव्याप्तिः । यथैकस्मिन्देशे हृदयादिदेशे वर्तमानस्याणोरपि सर्वस्मिन्देहेऽहमित्यभिनानुगुणव्याप्तिः स्वप्रभारूपचैतन्येन तद्वत् । तथा हि दर्शयति श्रुतिः " वालाग्रशतभागस्य शतधा कल्पितस्य च, भागो जीवः स विज्ञेयः स चानन्त्याय कल्पते " इति । प्रत्यगात्मनो ह्यणुत्वमेव स्वरूपमिति सूत्रकारमतम् । " नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् " इति परस्यैव महत्त्ववचनात् ॥

ननु परं ब्रह्म प्राप्तस्यान्तरबाह्यज्ञानबाधं दर्शयति श्रुतिः "प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्" इति

तत्कथं मुक्तस्य ज्ञानानन्त्यमुच्यते इत्यत्राह—

स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥ १६ ॥

नेदं मुक्तविषयम्। सुषुप्तिमरणयोरन्यतरापेक्षम्। आविष्कृतं हि श्रुत्या सुषुप्तिमरणयोर्निःसम्बोधत्वं मोक्षदशायां सर्वज्ञत्वं च। सुषुप्तौ तावत् "नाह खल्वयं संप्रत्यात्मानं जानात्ययमहमस्मीति नो एवेमानि भूतानि विनाशमेवापीतो भवति"इति। विनाशमदर्शनमित्यर्थः। मरणे च "एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति"इति। न पश्यतीत्यर्थः। मोक्षे तु "स वा एष दिव्येन चक्षुषा मनसैतान् कामान्पश्यन् रमते य एते ब्रह्मलोके" इति "सर्वं ह पश्यः पश्यति सर्वमाप्नोति सर्वशः" इति च ॥

(जगद्व्यापारवर्जाधिकरणम्)

जगद्व्यापारवर्जं प्रकरणादसंनिहितत्वाच्च ॥ १७ ॥

किं मुक्तस्य भोगो निखिलहेयप्रत्यनीककल्याणैकतानसकलेतरविलक्षणानवधिकातिशयानन्दमहाविभूतिरूपपरब्रह्मानुभव एव जगत्सृष्ट्यादिजगन्नियमनरूपलीलाऽपीति संशयः ॥ "निरञ्जनः परमं साम्यमुपैति" इत्यादिश्रुतेः जगन्नियमनरूपलीलापीति पूर्वः पक्षः ॥ राद्धान्तस्तु—"यतो वा इमानि भूतानि जायन्ते। सदेव सोम्येदमग्र आसीत्। ब्रह्म ह वा इदमेक एवाग्र आसीत्। आत्मा वा इदमेक एवाग्र आसीत्। एको ह वै नारायण आसीत्" इत्यादिषु परं ब्रह्म प्रकृत्यैव जगद्व्यापारः श्रूयते। तत्र तत्र प्रकरणे न मुक्तस्य सन्निधिरप्यस्ति। अतो जगन्नियमनरूपधुरावर्जम् "सोऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता। स एको ब्रह्मण आनन्दः श्रोत्रियस्य चाकामहतस्य" इति अनवधिकातिशयानन्दब्रह्मानुभवे मुक्तस्य साम्यम्। ब्रह्म

हि स्वस्य परस्य चानुभूयमानमविशेषेणानवधिकातिशयानन्दाय भवति। आनन्दस्वरूपत्वाविशेषात् ॥ सूत्रमपि व्याख्यातम् ॥

प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः॥१८॥

प्रत्यक्षः श्रुतिः। "तस्य सर्वेषु लोकेषु कामचारो भवति। इमान् लोकान् कामान् नीकामरूप्यनुसंचरन्" इत्यादिश्रुत्या मुक्तस्य जगद्व्यापारोपदेशात्सोऽपीति चेन्न। आधिकारिकमण्डलस्थोक्तेः। आधिकारिकाः परमपुरुषेण लोकनियमनाधिकारे नियुक्ता हिरण्यगर्भादयः। तल्लोकस्थभोगेषु मुक्तस्य यदीच्छा वर्तते तत्र तत्र यथाकामं परमपुरुषानुग्रहेण वर्तमानस्तत्स्थान्भोगान् भुंक्त इति तया श्रुत्योक्तेः। "कामाचारो भवति" इति हि श्रूयते न नियुंक्त इति ॥

ननु उत्पत्त्यादिविकारवर्तिहेयमिश्रोऽसल्पश्च कथं मुक्तस्य भोगो भवति यत इच्छातः सर्वेषु लोकेषु कामचार उच्यते इत्यत्राह—

विकारावर्ति च तथा हि स्थितिमाह ॥ १९ ॥

चशब्दोऽवधारणे। उत्पत्त्यादिविकारेषु न वर्तते इति विकारावर्ति परं ब्रह्मैवास्य मुक्तस्य भोगः। तथा हि मुक्तस्य स्थितिमाह "यदा ह्येवैष एतस्मिन्नदृश्येऽनात्म्ये निरुक्ते निलयनेऽभयं प्रतिष्ठां विन्दते अथ सोऽभयं गतो भवति। रसो वै सः रसं ह्येवायं लब्ध्वाऽऽनन्दी भवति" इति। ब्रह्मनिष्ठो ब्रह्मैव लब्ध्वाऽऽनन्दी भवतीत्यर्थः। ब्रह्म हि निरतिशयानन्दस्वरूपं निरतिशयकल्याणानन्तगुणकमनन्तमहाविभूति च। तत्र सविभूतिकब्रह्मानुभवाय विभूत्येकदेशभूतलोकेषु सञ्चरतः तत्र तत्र कामचारो भवति इत्युच्यते ॥

दर्शयतश्चैवं प्रत्यक्षानुमाने ॥ २० ॥

उत्पत्त्यादिजगन्नियमनं परस्यैव, मुक्तस्य तु परब्रह्मानुभव एव भोगः इत्युक्तमर्थं प्रत्यक्षानुमाने श्रुतिस्मृती दर्शयतः । "तस्माद्वा एतस्मादात्मन आकाशः संभूतः । भीषाऽस्माद्वातः पवते । एतस्य वा अक्षरस्य प्रशासने गार्गि सूर्याचन्द्रमसौ विधृतौ तिष्ठतः" इत्यादिका श्रुतिः स्मृतिरपि "अहं सर्वस्य प्रभवः । अहं सर्वस्य जगतः प्रभवः प्रलयस्तथा । विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् । मत्तः सर्वं प्रवर्तते । सो ऽभिध्याय शरीरात्स्वात्सिसृक्षुर्विविधाः प्रजाः । प्रशासितारं सर्वेषाम्" इत्यादिका परविषया । "अथाकामयमानो योऽकामो निष्काम आप्तकाम आत्मकामः" इत्यादिका श्रुतिः । स्मृतिरपि "प्रियो हि ज्ञानिनोऽत्यर्थमहम् । आस्थितः स हि युक्तात्मा मामेवानुत्तमां गतिम् । वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ॥

मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ।
ब्रह्मणो हि प्रतिष्ठाऽहममृतस्याव्ययस्य च ।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ॥"

इत्यादिका मुक्तविषया ।

भोगमात्रसाम्यलिङ्गाच्च ॥ २१ ॥

"सो ऽश्नुते सर्वान् कामान् सह ब्रह्मणा विपश्चिता" इति हि मुक्तस्य ब्रह्मानुभवभोगमात्रवचनात् ब्रह्मसाम्यलिङ्गाच्च जगद्व्यापारवर्जमिति निश्चीयते ॥

यदि नियंतृत्वं परस्यैव तर्हि स्वतन्त्रत्वेन मुक्तं परः कदाचित् पुनरावर्तयिष्यतीत्याह—

अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥ २२ ॥

अस्य मुक्तस्यानावृत्तिः शब्दादवगम्यते। यथा "यतो वा इमानि भूतानि जायन्ते। सोऽकामयत बहु स्यां प्रजायेयेति। यः पृथिवीमंतरो यमयति। य आत्मानमन्तरो यमयति" इति शब्दात्परमपुरुषस्य स्रष्टृत्वं नियन्तृत्वं चावगम्यते तथा "एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते। स खल्वेवं वर्तयन् यावदायुषं ब्रह्मलोकमभिसंपद्यते न च पुनरावर्तते।

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम्।
नाप्नुवन्ति महात्मानः संसिद्धिं परमां गताः॥
आ ब्रह्मभवनाल्लोकाः पुनरावर्तिनोऽर्जुन।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते॥
इदं ज्ञानमुपाश्रित्य मम साधर्म्यमागताः।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च॥"

इति शब्दादेवैनं कदाचिदपि नावर्तयतीत्यवगम्यते॥ सूत्रावृत्तिः शास्त्रपरिसमाप्तिं द्योतयतीति सर्वं समञ्जसम्॥

इति श्रीभगवद्रामानुजविरचिते वेदान्तदीपे चतुर्थस्याध्यायस्य चतुर्थः पादः। समाप्तोऽध्यायः॥

शास्त्रं च परिसमाप्तम्॥

नमः परमर्षिभ्यः ।

ब्रह्मसूत्रपाठः ।

१ (१)अथातो ब्रह्मजिज्ञासा ॥
२ (२)जन्माद्यस्य यतः ॥
३ (३)शास्त्रयोनित्वात् ॥
४ (४)तत्तु समन्वयात् ॥
५ (५)ईक्षतेर्नाशब्दम् ॥
६ गौणश्चेन्नात्मशब्दात् ॥
७ तन्निष्ठस्य मोक्षोपदेशात् ॥
८ हेयत्वावचनाच्च ॥
९ प्रतिज्ञाविरोधात्[१] ॥
१० स्वाप्ययात् ॥
११ गतिसामान्यात् ॥
१२ श्रुतत्वाच्च ॥
१३ (६)आनन्दमयोऽभ्यासात् ॥
१४ विकारशब्दान्नेति चेन्न प्राचुर्यात् ॥
१५ तद्धेतुव्यपदेशाच्च ॥
१६ मान्त्रवर्णिकमेव च गीयते[२] ॥
१७ नेतरोऽनुपपत्तेः ॥
१८ भेदव्यपदेशाच्च ॥
१९ कामाच्च नानुमानापेक्षा ॥
२० अस्मिन्नस्य च तद्योगं शास्ति ॥
२१ (७)अन्तस्तद्धर्मोपदेशात् ॥
२२ भेदव्यपदेशाच्चान्यः ॥
२३ (८)आकाशस्तल्लिङ्गात् ॥
२४ (९)अत एव प्राणः ॥
२५ ज्योतिश्चरणाभिधानात् ॥
२६ छन्दोऽभिधानान्नेति चेन्न तथा चेतोऽर्पणनिगमा[३]त्तथा हि दर्शनम् ॥
२७ भूतादिपादव्यपदेशोपपत्तेश्चैवम् ॥
२८ उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् ॥
२९ (११)प्राणस्तथानुगमात् ॥
३० न वक्तुरात्मोपदेशादिति चे-

---

१ केचिदेतत्सूत्रं न पठन्ति । २ गम्यते इति कश्चित्पठति ।
३ निगदात् इति केचित्पठन्ति ।

दध्यात्मसम्बन्धभूमा ह्य-
स्मिन् ॥
३१ शास्त्रदृष्ट्या तूपदेशो वाम-
देववत् ॥
३२ जीवमुख्यप्राणालङ्गान्नेति
चेन्नोपासात्रैविध्यादाश्रि-
तत्वादिह तद्योगात् ॥

इति प्रथमाध्यायस्य प्रथमः पादः ॥

—:०:—

१ (१)सर्वत्र प्रसिद्धोपदेशात् ॥
२ विवक्षितगुणोपपत्तेश्च ॥
३ अनुपपत्तेस्तु न शारीरः ॥
४ कर्मकर्तृव्यपदेशाच्च ॥
५ शब्दविशेषात् ॥
६ स्मृतेश्च ॥
७ अर्भकौकस्त्वात्तद्व्यपदेशाच्च
नेति चेन्न निचाय्यत्वादेवं
व्योमवच्च ॥
८ सम्भोगप्राप्तिरिति चेन्न
वैशेष्यात् ॥
९ (२)अत्ता चराचरग्रहणात् ॥
१० प्रकरणाच्च ॥
११ गुहां प्रविष्टावात्मानौ हि
तद्दर्शनात् ॥
१२ विशेषणाच्च ॥
१३ (३)अन्तर उपपत्तेः ॥
१४ स्थानादिव्यपदेशाच्च ॥
१५ सुखविशिष्टाभिधानादेव च ॥
१६ अत एव च स ब्रह्म[१] ॥
१७ श्रुतोपनिषत्कगत्यभिधानाच्च ॥
१८ अनवस्थितेरसम्भवाच्च
नेतरः ॥
१९ (४)अन्तर्याम्यधिदेवाधिलो-
कादिषु तद्धर्मव्यप-
देशात् ॥
२० न च स्मार्तमतद्धर्माभिला-
पाच्छारीरश्च[२] ॥
२१ उभयेऽपि हि भेदेनैनमधी-
यते ॥
२२ (५)अदृश्यत्वादिगुणको ध-
र्मोक्तेः ॥
२३ विशेषणभेदव्यपदेशाभ्यां
च नेतरौ ॥
२४ रूपोपन्यासाच्च ॥
२५ (६)वैश्वानरः साधारणशब्द-
विशेषात् ॥

---

१ केचिदेतत्सूत्रं न पठन्ति ।
२ केचिच्छारीरश्चेत्यंशमग्रिम-सूत्रादौ पठन्ति ।
३ अधिलोकशब्दः कैश्चिन्नपठ्यते ।

२६ स्मर्यमाणमनुमानं स्यादिति ॥

२७ शब्दादिभ्योऽन्तः प्रतिष्ठानाच्च ने[1]ति चेन्न तथा दृष्टुयपदेशादसम्भवात्पुरुषमपि[2]चैनमधीयते ॥

२८ अत एव न देवता भूतञ्च ॥

२९ साक्षादप्यविरोधं जैमिनिः ॥

३० अभिव्यक्तेरित्याश्मरथ्यः ॥

३१ अनुस्मृतेर्बादरिः ॥

३२ सम्पत्तेरिति जैमिनिस्तथाहि दर्शयति ॥

३३ आमनन्ति चैनमस्मिन् ॥

इति प्रथमाध्यायस्य द्वितीयः पादः ॥

—:०:—

१ (१)द्युभ्वाद्यायतनं स्वशब्दात् ॥

२ मुक्तोपसृप्यव्यपदेशाच्च ॥

३ नानुमानमतच्छब्दात्प्राणभृच्च ॥[3]

४ भेदव्यपदेशाच्च[4] ॥

५ प्रकरणात् ॥

६ स्थित्यदनाभ्याञ्च ॥

७ (२)भूमा सम्प्रसादादध्युपदेशात् ॥

८ धर्मोपपत्तेश्च ॥

९ (३)अक्षरमम्बरान्तधृतेः ॥

१० सा च प्रशासनात् ॥

११ अन्यभावव्यावृत्तेश्च ॥

१२ (४)ईक्षतिकर्मव्यपदेशात्सः ॥

१३ (५)दहर उत्तरेभ्यः ॥

१४ गतिशब्दाभ्यां तथाहि दृष्टं लिङ्गञ्च ॥

१५ धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः ॥

१६ प्रसिद्धेश्च ॥

१७ इतरपरामर्शात्स इति चेन्नासम्भवात् ॥

१८ उत्तराच्चेदाविर्भूतस्वरूपस्तु ॥

१९ अन्यार्थश्च परामर्शः ॥

२० अल्पश्रुतेरिति चेत्तदुक्तम् ॥

२१ अनुकृतेस्तस्य च ॥

२२ अपि[5]स्मर्यते ॥

२३ (६)शब्दादेव प्रमितः ॥

२४ हृद्यपेक्षया तु मनुष्याधिकारत्वात् ॥

---

१ ष्ठानाच्च इति कैश्चित्पठ्यते । २ पुरुषविधमपीति कश्चित्पठति ।
३ केचित्प्राणभृच्चेति पृथक्सूत्रं पठन्ति ।
४ चकारः क्वचिन्नास्ति । ५ अपि चेति केचित्पठन्ति ॥

२५ (७)तदुपर्यपि बादरायणः सम्भवात् ॥
२६ विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् ॥
२७ शब्द इतिचेन्नातः प्रभवात् प्रत्यक्षानुमानाभ्याम् ॥
२८ अत एव च नित्यत्वम् ॥
२९ समाननामरूपत्वाच्चावृत्तावप्यविरोधो दर्शनात्स्मृतेश्च ॥
३० (८)मध्वादिष्वसम्भवादनधिकारं जैमिनिः ॥
३१ ज्योतिषि भावाच्च ॥
३२ भावन्तु बादरायणोऽस्ति हि ॥
३३ (९)शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि ॥
३४ क्षत्रियत्वगतेश्च ॥
३५ उत्तरत्र चैत्ररथेन लिङ्गात्[१] ॥
३६ संस्कारपरामर्शात्तदभावाभिलापाच्च ॥
३७ तदभावनिर्द्धारणे च प्रवृत्तेः ॥
३८ श्रवणाध्ययनार्थप्रतिषेधात् ॥
३९ स्मृतेश्च[२] ॥
४० (६)कम्पनात् ॥
४१ ज्योतिर्दर्शनात् ॥
४२ (१०)आकाशो ऽर्थान्तरत्वादिव्यपदेशात् ॥
४३ सुषुप्त्युत्क्रान्त्योर्भेदेन ॥
४४ पत्यादिशब्देभ्यः ॥

इति प्रथमाध्यायस्य तृतीयः पादः ॥

---

१ (१)आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च ॥
२ सूक्ष्मन्तु तदर्हत्वात् ॥
३ तदधीनत्वादर्थवत् ॥
४ ज्ञेयत्वावचनाच्च ॥
५ वदतीति चेन्न प्राज्ञो हि प्रकरणात् ॥[३]
६ त्रयाणामेव चैवमुपन्यासः प्रश्नश्च ॥
७ महद्वच्च ॥
८ (२)चमसवदविशेषात् ॥
९ ज्योतिरुपक्रमा तु तथा ह्यधीयत एके ॥

---

१ केचिदादिममेतच्चैकं पठन्ति । क्षत्रियत्वावगतेरिति तेषां पाठः ।
२ केचिदेतदादिमसूत्रेण मेलयन्ति । ३ प्रकरणादिति पृथक् सूत्रं पठति कश्चित् ।

१० कल्पनोपदेशाच्च मध्वादि-
वदविरोधः ॥
११ (३)न संख्योपसंग्रहादपि ना-
नाभावादतिरेकाच्च ॥
१२ प्राणादयो वाक्यशेषात् ॥
१३ ज्योतिषैकेषामसत्यन्ने ॥
१४ (४ कारणत्वेन चाकाशादिषु
यथाव्यपदिष्टोक्तेः ॥
१५ समाकर्षात् ॥
१६ (५)जगद्वाचित्वात् ॥
१७ जीवमुख्यप्राणलिङ्गान्नेति
चेत्तद्व्याख्यातम् ॥
१८ अन्यार्थन्तु जैमिनिः प्रश्न-
व्याख्यानाभ्यामपि चैवमेके ॥
१९ (६)वाक्यान्वयात् ॥
२० प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः ॥
२१ उत्क्रमिष्यत एवं भावादि-
त्यौडुलोमिः ॥
२२ अवस्थितेरिति काशकृत्स्नः ॥
२३ (७)प्रकृतिश्च प्रतिज्ञादृष्टान्ता-
नुपरोधात् ॥
२४ अभिध्योपदेशाच्च ॥
२५ साक्षाच्चोभयाम्नानात् ॥
२६ आत्मकृतेः ॥[1]
२७ परिणामात् ॥[2]
२८ योनिश्च हि गीयते ॥
२९ (८)एतेन सर्वे व्याख्याता
व्याख्याताः ॥

इति प्रथमाध्यायस्य चतुर्थपादः ॥

—§—

अथ द्वितीयो ऽध्यायः ।

१ (१)स्मृत्यनवकाशदोषप्रसङ्ग
इति चेन्नान्यस्मृत्यनवका-
शदोषप्रसङ्गात् ॥
२ इतरेषाञ्चानुपलब्धेः ॥
३ (२)एतेन योगः प्रत्युक्तः ॥
४ (३)न विलक्षणत्वादस्य त-
थात्वञ्च शब्दात्[3] ॥
५ अभिमानिव्यपदेशस्तु वि-
शेषानुगतिभ्याम् ॥
६ दृश्यते तु[4] ॥
७ असदिति चेन्न प्रतिषेधमा-
त्रत्वात् ॥

१ आत्मकृतेः परिणामादित्येकमेव केचित्सूत्रं पठन्ति ।
२ लिङ्गादिति चेत्तदिति कश्चित् लिङ्गादिति चेन्न तदिति क-
श्चिच्च पठतः ॥
३ कश्चिदेतत्सूत्रानन्तरं दृश्यते तु इत्यप्येकं सूत्रं पठति ।
४ दृश्यते च इति कश्चित्पठति ।

८ अपीतौ तद्वत्प्रसङ्गादस-
मञ्जसम् ॥
९ न तु दृष्टान्तभावात् ॥
१० स्वपक्षदोषाच्च ॥
११ तर्काप्रतिष्ठानादपि ॥
१२ अन्यथानुमेयमिति चेदेवम-
प्यनिर्मोक्षप्रसङ्गः[१] ॥
१३ (४)एतेन शिष्टापरिग्रहा
अपि व्याख्याताः ॥
१४ (५)भोक्त्रापत्तेरविभागश्चेत्
स्याल्लोकवत् ॥
१५ (६)तदनन्यत्वमारम्भणश-
ब्दादिभ्यः ॥
१६ भावे चोपलब्धेः ॥
१७ सत्त्वाच्चापरस्य[२] ॥
१८ असद्व्यपदेशान्नेति चेन्न ध-
र्मान्तरेण वाक्यशेषाद्युक्तेः
शब्दान्तराच्च[३] ॥
१९ पटवच्च ॥
२० यथा च[४] प्राणादिः[५] ॥
२१ (७)इतरव्यपदेशाद्धिताक-
रणादिदोषप्रसक्तिः ॥
२२ अधिकन्तु भेदनिर्देशात् ॥
२३ अश्मादिवच्च तदनुपपत्तिः ॥
२४ (८)उपसंहारदर्शनान्नेति चेन्न
क्षीरवद्धि ॥
२५ देवादिवदपि लोके ॥
२६ (९)कृत्स्नप्रसक्तिर्निरवयव-
त्वशब्दकोपो वा ॥
२७ श्रुतेस्तु शब्दमूलत्वात् ॥
२८ आत्मनि चैवं विचित्राश्च हि ॥
२९ स्वपक्षदोषाच्च ॥
३० सर्वोपेता च तद्दर्शनात् ॥
३१ विकरणत्वान्नेति चेत्तदुक्तम् ॥
३२ (१०)न प्रयोजनवत्त्वात् ॥
३३ लोकवत्तु लीलाकैवल्यम् ॥
३४ वैषम्यनैर्घृण्ये न सापेक्षत्वा-
त्तथा हि दर्शयति ॥
३५ न कर्माविभागादिति चे-
न्नानादित्वादुपपद्यते चा-
प्युपलभ्यते च[७] ॥

---

१ ११-१२ सूत्रे मेलयन्ति केचित् । तत्र केनचित् तिष्ठानादन्य-
थाऽप्यनु इति पठ्यते । २ अवरस्येति केषां चित्पाठः ।
३ युक्तेः शब्दान्तराच्चेति पृथक्कृतं कैश्चित् ।
४ चकारः केनचिन्न पठ्यते । ५ नपुंसकं केचित्पठन्ति ।
६ नकर्मवि इति कश्चित् पठति ।
७ उपपद्यते इत्याद्यंशं केचित्पृथक्कुर्वन्ति ।

३६ सर्वधर्मोपपत्तेश्च ॥

इति द्वितीयाध्यायस्य प्रथमः पादः ॥

—:०:—

१ (१)रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च[१] ॥

२ पयोऽम्बुवच्चेत्तत्रापि ॥

३ व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॥

४ अन्यत्राभावाच्च न तृणादिवत् ॥

५ पुरुषाश्मवदिति चेत्तथापि[२] ॥

६ अङ्गित्वानुपपत्तेश्च ॥

७ अन्यथानुमितौ च ज्ञशक्तिवियोगात् ॥

८ अभ्युपगमेऽप्यर्थाभावात् ॥[३]

९ विप्रतिषेधाच्चासमञ्जसम् ॥

१० (२)महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥

११ उभयथापि न कर्मातस्तदभावः ॥

१२ समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॥

१३ नित्यमेव च भावात् ॥

१४ रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ॥

१५ उभयथा च[४] दोषात् ॥

१६ अपरिग्रहाच्चात्यन्तमनपेक्षा ॥

१७ (३)समुदाय उभयहेतुकेऽपि तदप्राप्तिः ॥

१८ इतरेतरप्रत्ययत्वादुपपन्नमिति चेन्न संघातभावा[५]निमित्तत्वात् ॥

१९ उत्तरोत्पादे च पूर्वनिरोधात् ॥

२० असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॥

२१ प्रतिसंख्याऽप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् ॥

२२ उभयथा च दोषात् ॥

२३ आकाशे चाविशेषात् ॥

२४ अनुस्मृतेश्च ॥

५ नासतो ऽदृष्टत्वात् ॥

---

१ प्रवृत्तेश्च इति पृथक् सूत्रं केचित् पठन्ति ।

२ तत्रापीति पाठो ऽपि कस्यचिन्मतग्रन्थेषु क्वचिद्दृश्यते ॥

३ केचिदेतत्सूत्रं ४र्थसूत्रानन्तरं पठन्ति ।

४ उभयथापि चेति कश्चित् पठति ॥

५ इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वादिति केचित् पठन्ति ।

८ अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् ॥
९ न तु दृष्टान्तभावात् ॥
१० स्वपक्षदोषाच्च ॥
११ तर्काप्रतिष्ठानादपि ॥
१२ अन्यथानुमेयमिति चेदेवमप्यनिर्मोक्षप्रसङ्गः१ ॥
१३ (४)एतेन शिष्टापरिग्रहा अपि व्याख्याताः ॥
१४ (५)भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत् ॥
१५ (६)तदनन्यत्वमारम्भणशब्दादिभ्यः ॥
१६ भावे चोपलब्धेः ॥
१७ सत्त्वाच्चापरस्य२ ॥
१८ असद्व्यपदेशान्नेति चेन्न धर्मान्तरेण वाक्यशेषाद्युक्तेः शब्दान्तराच्च३ ॥
१९ पटवच्च ॥
२० यथा च४ प्राणादिः५ ॥
२१ (७)इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः ॥
२२ अधिकन्तु भेदनिर्देशात् ॥
२३ अश्मादिवच्च तदनुपपत्तिः ॥
२४ (८)उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि ॥
२५ देवादिवदपि लोके ॥
२६ (९)कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा ॥
२७ श्रुतेस्तु शब्दमूलत्वात् ॥
२८ आत्मनि चैवं विचित्राश्च हि ॥
२९ स्वपक्षदोषाच्च ॥
३० सर्वोपेता च तद्दर्शनात् ॥
३१ विकरणत्वान्नेति चेत्तदुक्तम् ॥
३२ (१०)न प्रयोजनवत्त्वात् ॥
३३ लोकवत्तु लीलाकैवल्यम् ॥
३४ वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति ॥
३५ न कर्माविभागादिति चेन्नानादित्वादुपपद्यते चाप्युपलभ्यते च७ ॥

---

१ ११-१२ सूत्रे मेलयन्ति केचित् । तत्र केनचित् तिष्ठानादन्यथाऽप्यनु इति पठ्यते । २ अवरस्येति केषांचित्पाठः ।
३ युक्तेः शब्दान्तराच्चेति पृथक्कृतं कैश्चित् ।
४ चकारः केनचिन्न पठ्यते । ५ नपुंसकं केचित्पठन्ति ।
६ नकर्मवि इति कश्चित् पठति ।
७ उपपद्यते इत्याद्यंशं केचित्पृथक्कुर्वन्ति ।

३६ सर्वधर्मोपपत्तेश्च ॥

इति द्वितीयाध्यायस्य प्रथमः पादः॥

—:०:—

१ (१)रचनानुपपत्तेश्च नानुमानं प्रवृत्तेश्च[१] ॥

२ पयोऽम्बुवच्चेत्तत्रापि ॥

३ व्यतिरेकानवस्थितेश्चानपेक्षत्वात् ॥

४ अन्यत्राभावाच्च न तृणादिवत्॥

५ पुरुषाश्मवदिति चेत्तथापि[२]॥

६ अङ्गित्वानुपपत्तेश्च ॥

७ अन्यथानुमितौ च ज्ञशक्तिवियोगात् ॥

८ अभ्युपगमेऽप्यर्थाभावात्॥[३]

९ विप्रतिषेधाच्चासमञ्जसम् ॥

१० (२)महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् ॥

११ उभयथापि न कर्मातस्तद्भावः ॥

१२ समवायाभ्युपगमाच्च साम्यादनवस्थितेः ॥

१३ नित्यमेव च भावात् ॥

१४ रूपादिमत्त्वाच्च विपर्ययो दर्शनात् ॥

१५ उभयथा च[४] दोषात् ॥

१६ अपरिग्रहाच्चात्यन्तमनपेक्षा ॥

१७ (३)समुदाय उभयहेतुकेऽपि तदप्राप्तिः ॥

१८ इतरेतरप्रत्ययत्वादुपपन्नमिति चेन्न संघातभावा[५]निमित्तत्वात् ॥

१९ उत्तरोत्पादे च पूर्वनिरोधात्॥

२० असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा ॥

२१ प्रतिसंख्याऽप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् ॥

२२ उभयथा च दोषात् ॥

२३ आकाशे चाविशेषात् ॥

२४ अनुस्मृतेश्च ॥

२५ नासतोऽदृष्टत्वात् ॥

---

१ प्रवृत्तेश्च इति पृथक् सूत्रं केचित् पठन्ति ।

२ तत्रापीति पाठोऽपि कस्यचिन्मतग्रन्थेषु क्वचिद्दृश्यते ॥

३ केचिदेतत्सूत्रं ४र्थसूत्रानन्तरं पठन्ति ।

४ उभयथापि चेति कश्चित् पठति ॥

५ इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वादिति केचित् पठन्ति ।

२६ उदासीनानामपि चैवं सिद्धिः ॥
२७ (४)नाभाव उपलब्धेः ॥
२८ वैधर्म्याच्च न स्वप्नादिवत् ॥
२९ न भावोऽनुपलब्धेः[१] ॥
३० (५)सर्वथाऽनुपपत्तेश्च ॥
३१ (६)नैकस्मिन्नसम्भवात् ॥
३२ एवञ्चात्माऽकात्स्न्र्यम् ॥
३३ न च पर्यायादप्यविरोधो विकारादिभ्यः ॥
३४ अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः[२] ॥
३५ (७)पत्युरसामञ्जस्यात्[३] ॥
३६ अधिष्ठानानुपपत्तेश्च ॥
३७ करणवच्चेन्न भोगादिभ्यः ॥
३८ अन्तवत्त्वमसर्वज्ञता वा ॥
३९ (८)उत्पत्त्यसम्भवात् ॥
४० न च कर्तुः करणम् ॥
४१ विज्ञानादिभावे वा तदप्रतिषेधः ॥
४२ विप्रतिषेधाच्च ॥

इति द्वितीयाध्यायस्य द्वितीयः पादः ॥

—:०:—

१ (१)न वियदश्रुतेः ॥
२ अस्ति तु ॥
३ गौण्यसम्भवाच्छब्दाच्च[४] ॥
४ स्याच्चैकस्य[५] ब्रह्मशब्दवत् ॥
५ प्रतिज्ञाहानिरव्यतिरेकात् ॥
६ शब्देभ्यः[६] ॥
७ यावद्विकारन्तु विभागो लोकवत् ॥
८ एतेन मातरिश्वा[७] व्याख्यातः ॥
९ असम्भवस्तु सतोऽनुपपत्तेः ॥
१० (२)तेजोऽतस्तथा ह्याह ॥
११ आपः ॥
१२ पृथिवी[८] ॥

---

१ केचिदेतदनन्तरं क्षणिकत्वाच्च इति सूत्रमपि पठन्ति ।
२ अविशेषादिति केचित् पठन्ति ॥
३ एतदनन्तरं सम्बन्धानुपपत्तेश्चेति सूत्रमपि केचित्पठन्ति । तत्र पत्तेश्चेति कश्चित् पठन्ति ॥
४ शब्दाच्च इति पृथक्सूत्रं पठन्ति केचित् ॥
५ स्याच्चैकस्यापीति केचित्पठन्ति ॥
६ केचिच्छब्देभ्य इति पूर्वसूत्रेण मेलयन्ति ॥
७ रिश्वापीति कश्चित्पठति । ८ केचिदेतदग्रिमसूत्रेण मेलयन्ति ॥

१३ अधिकाररूपशब्दान्तरेभ्यः[1] ॥

१४ तदभिध्यानादेव तु तल्लिङ्गात्सः ॥

१५ विपर्ययेण तु क्रमोऽत उपपद्यते च[2] ॥

१६ अन्तरा विज्ञानमनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् ॥

१७ चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशोऽभाक्तस्तद्भावभावित्वात् ॥

१८ (३)नात्माश्रुतेर्नित्यत्वाच्च ताभ्यः ॥

१९ (४)ज्ञो ऽत एव[3] ॥

२० उत्क्रान्तिगत्यागतीनाम् ॥

२१ स्वात्मना चोत्तरयोः ॥

२२ नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् ॥

२३ स्वशब्दोन्मानाभ्याञ्च ॥

२४ अविरोधश्चन्दनवत् ॥

२५ अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि ॥

२६ गुणाद्वाऽलोकवत् ॥

२७ व्यतिरेको गन्धवत्तथा च दर्शयति[4] ॥

२८ पृथगुपदेशात् ॥

२९ तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् ॥

३० यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् ॥

३१ पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्ति[5]योगात् ॥

३२ नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमो वाऽन्यथा ॥

३३ (५)कर्ता शास्त्रार्थवत्त्वात् ॥

३४ उपादानाविहारोपदेशाच्च ॥

३५ व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः ॥

३६ उपलब्धिवदनियमः ॥

---

१ शब्दान्तरादिभ्य इति कश्चित्पठति पूर्वसूत्रेणास्यैक्यं च ॥

२ कश्चिच्चकारं न पठति ।

३ कश्चिदेतत्सूत्रानन्तरं युक्तेश्चेति सूत्रमधिकं पठति ॥

४ तथा चेत्यादि पृथक्पठन्ति केचित् ॥

५ सतो व्यक्तीति कश्चित् पठति ॥

६ केचिदेतत्सूत्रस्थाने विहारोपदेशात्–उपादानादिति सूत्रद्वयं पठन्ति।

३७ शक्तिविपर्ययात् ॥
३८ समाध्यभावाच्च ॥
३९ यथा च तक्षोभयथा ॥
४० (६)परात्तु तच्छ्रुतेः ॥
४१ कृतप्रयत्नापेक्षस्तु विहित-
प्रतिषिद्धा१वैयर्थ्यादिभ्यः ॥
४२ (७)अंशो नानाव्यपदेशाद-
न्यथा चापि दाशकितवादि-
त्वमधीयत एके ॥
४३ मन्त्रवर्णात्२ ॥
४४ अपि३ स्मर्यते ॥
४५ प्रकाशादिवत्तु नै४वं परः ॥
४६ स्मरन्ति च ॥
४७ अनुज्ञापरिहारौ देहसम्ब-
न्धाज्ज्योतिरादिवत् ॥
४८ असन्ततेश्चाव्यतिकरः ॥
४९ आभासा५ एव च ॥
५० अदृष्टानियमात् ॥
५१ अभिसन्ध्यादिष्वपि चैवम् ॥
५२ प्रदेशभेदादिति चे६न्नान्त-
र्भावात् ॥

इति द्वितीयाध्यायस्य तृतीयः पादः ॥

—:०:—

१ (१)तथा प्राणाः ॥
२ गौण्यसम्भवात्तत्प्राक्छ्रु-
तेश्च७ ॥
३ तत्पूर्वकत्वाद्वाचः ॥
४ (२)सप्तगतेर्विशेषितत्वाच्च ॥
५ हस्तादयस्तु स्थितेऽतो
नैवम् ॥
६ (३)अणवश्च ॥
७ श्रेष्ठश्च ॥
८ (४)न वायुक्रिये पृथगुपदे-
शात् ॥
९ चक्षुरादिवत्तु तत् सहशि-
ष्ट्यादिभ्यः ॥
१० अकरणत्वाच्च न दोष-
स्तथा हि दर्शयति ॥
११ पञ्चवृत्तिर्मनोवद्व्यपदिश्यते ॥
१२ (५)अणुश्च ॥

---

१ प्रतिषेधा इति कस्य चित्पाठः । २ र्णाच्च इति केषांचित्पाठः ।
३ अपि चेति केषाञ्चित्पाठः ॥ ४ वन्नै इति केषां चित्पाठः ।
५ एकवचनान्तं केचित् पठन्ति ॥
६ प्रदेशादिति चेदिति केचित् पठन्ति ॥
७ तत्प्रागित्यादिसूत्रान्तरीकुर्वन्ति केचित् । तस्यादौ प्रतिज्ञानुप-
रोधाच्च इति सूत्रमपि कश्चित्पठति ॥

१३ (६)ज्योतिराद्यधिष्ठानं तु तदामननात् प्राणवता शब्दात्[1] ॥
१४ तस्य च नित्यत्वात् ॥
१५ (७)त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् ॥
१६ भेदश्रुतेर्वैलक्षण्याच्च[2] ॥
१७ (८)संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् ॥
१८ मांसादि भौमं यथाशब्दमितरयोश्च ॥
१९ वैशेष्यात्तु तद्वादस्तद्वादः ॥

इति द्वितीयाध्यायस्य चतुर्थः पादः ॥

—:०:—

अथ तृतीयो ऽध्यायः ।

१ (१)तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् ॥
२ त्र्यात्मकत्वात्तु भूयस्त्वात् ॥
३ प्राणगतेश्च ॥
४ अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ॥
५ प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ॥
६ अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ॥
७ भाक्तं वाऽनात्मवित्त्वात्तथा हि दर्शयति ॥
८ (२)कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च[3] ॥
९ चरणादिति चेन्न तदुपलक्षणार्थेति कार्ष्णाजिनिः ॥
१० आनर्थक्यमिति चेन्न तदपेक्षत्वात् ॥
११ सुकृतदुष्कृते एवेति तु बादरिः ॥
१२ (३)अनिष्टादिकारिणामपि च श्रुतम् ॥
१३ संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ॥
१४ स्मरन्ति च ॥
१५ अपि[4] सप्त ॥
१६ तत्रापि[5] तद्व्यापारादविरोधः ॥

---

१ केचित्प्राणवतेत्यादि पृथक्कुर्वन्ति ।
२ केचिद्वैलक्षण्याच्चेति पृथक्कुर्वन्ति ॥
३ यथेतमित्यादि पृथक् पठति कश्चित् ॥
४ अपि चेति केचित् पठन्ति । ५ तत्रापि चेति केचित् पठन्ति ।

१७ विद्याकर्मणोरिति तु प्रकृतत्वात् ॥
१८ न तृतीये तथोपलब्धेः ॥
१९ स्मर्यतेऽपि च लोके ॥
२० दर्शनाच्च ॥
२१ तृतीयशब्दावरोधः संशोकजस्य ॥
२२ (४)तत्स्वा[1]भाव्यापत्तिरुपपत्तेः ॥
२३ (५)नातिचिरेण विशेषात् ॥
२४ (६)अन्याधिष्ठिते पूर्ववदभिलापात् ॥
२५ अशुद्धमिति चेन्न शब्दात् ॥
२६ रेतःसिग्योगोऽथ ॥
२७ योनेः शरीरम् ॥

इति तृतीयाध्यायस्य प्रथमः पादः ॥

---

१ (१)सन्ध्ये सृष्टिराह हि ॥
२ निर्मातारञ्चैके पुत्रादयश्च ॥
३ मायामात्रन्तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्[2] ॥
४ पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ॥
५ देहयोगाद्वा सोऽपि ॥
६ सूचकश्च हि श्रुतेराचक्षते च तद्विदः ॥
७ (२)तदभावो नाडीषु तच्छ्रुतेरात्मनि च[3] ॥
८ अतः प्रबोधोऽस्मात् ॥
९ (३)स एव तु[4] कर्मानुस्मृतिशब्दविधिभ्यः ॥
१० (४)मुग्धेऽर्धसम्पत्तिः परिशेषात् ॥
११ (५)न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ॥
१२ भेदा[5]दिति चेन्न प्रत्येकमतद्वचनात् ॥
१३ अपि चैवमेके ॥
१४ अरूपवदेव हि तत्प्रधानत्वात् ॥
१५ प्रकाशवच्चावैयर्थ्यात्[6] ॥
१६ आह च तन्मात्रम् ॥
१७ दर्शयति चाथो अपि स्मर्यते ॥
१८ अत एव चोपमा सूर्यकादिवत् ॥

---

१ तत्साभाव्येति केचित् पठन्ति ।
२ केचिदेतत्सूत्रानन्तरं सूचकश्चेत्यादि सूत्रं पाठन्ति ।
३ रात्मनिहेति कश्चित् पठति । ४ स एव चेति कश्चित् पठति ।
५ न भेदादिति केचित् पठन्ति । ६ यर्थ्यमिति कश्चित् पठति ।

१९ अम्बुवदग्रहणात्तु न तथात्वम् ॥

२० वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवं दर्शनाच्च[1] ॥

२१ प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ॥

२२ तदव्यक्तमाह हि ॥

२३ अपि संराधने प्रत्यक्षानुमानाभ्याम् ॥

२४ प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ॥

२५ अतोऽनन्तेन तथा हि लिङ्गम् ॥

२६ (६)उभयव्यपदेशात्त्वहिकुण्डलवत् ॥

२७ प्रकाशाश्रयवद्वा तेजस्त्वात् ॥

२८ पूर्ववद्वा ॥

२९ प्रतिषेधाच्च ॥

३० (७)परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः ॥

३१ सामान्यात्तु[3] ॥

३२ बुद्ध्यर्थः पादवत् ॥

३३ स्थानविशेषात् प्रकाशादिवत् ॥

३४ उपपत्तेश्च ॥

३५ तथान्य[4]प्रतिषेधात् ॥

३६ अनेन सर्वगतत्वमायामशब्दादिभ्यः ॥

३७ (८)फलमत उपपत्तेः ॥

३८ श्रुतत्वाच्च ॥

३९ धर्मं जैमिनिरत एव ॥

४० पूर्वं तु बादरायणो हेतुव्यपदेशात् ॥

इति तृतीयाध्यायस्य द्वितीयः पादः ॥

—:०:—

१ (१)सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ॥

२ भेदान्नेति चेदे[5]कस्यामपि ॥

३ स्वाध्यायस्य तथात्वे[6] हि

---

१ केचिद्दर्शनाच्चेति पृथक्कुर्वन्ति। तत्र कश्चित् भाक्तमन्तरिति पठति ॥

२ कश्चित् प्रकाशवच्चेति पठति। प्रकाशश्चेत्यादि पृथक्सूत्रीकरोति च ॥

३ एतत्सूत्रस्थाने दर्शनादिति सूत्रं कश्चित् पठति।

४ तथान्यदिति कश्चित् पठति।

५ दान्नेति चेन्न इति केचित् पठन्ति। दादिति चेन्न इति कश्चित् पठति।

६ त्वेनेति केचित्पठन्ति।

समाचारेऽधिकाराच्च सववच्च तन्नियमः[१] ॥

४ दर्शयति च ॥

५ उपसंहारोऽर्थाभेदाद्विधिशेषवत् समाने च ॥

६ (२)अन्यथात्वं[२] शब्दादिति चेन्नाविशेषात् ॥

७ न वा प्रकरणभेदात् परोवरीयस्त्वादिवत् ॥

८ संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ॥

९ व्याप्तेश्[३]च समञ्जसम् ॥

१० (३)सर्वाभेदादन्यत्रेमे ॥

११ (४)आनन्दादयः प्रधानस्य ॥

१२ प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ॥

१३ इतरे त्वर्थसामान्यात् ॥

१४ आध्यानाय प्रयोजनाभावात् ॥

१५ आत्मशब्दाच्च ॥

१६ आत्मगृहीतिरितरवदुत्तरात् ॥

१७ अन्वयादिति चेत् स्यादवधारणात् ॥

१८ (५)कार्याख्यानादपूर्वम् ॥

१९ (६)समान एवञ्चाभेदात् ॥

२० (७)सम्बन्धादेवमन्यत्रापि ॥

२१ न वा विशेषात् ॥

२२ दर्शयति च ॥

२३ (८)सम्भृतिद्युव्याप्त्यपि चातः ॥

२४ (९)पुरुषविद्यायामपि[४] चेतरेषामनाम्नानात् ॥

२५ (१०)वेधाद्यर्थभेदात् ॥

२६ (११)हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दःस्तुत्युपगानवत्तदुक्तम् ॥

२७ (१२)साम्पराये तर्तव्याभावात् तथा ह्यन्ये ॥

२८ छन्दत उभयाविरोधात् ॥

२९ गतेरर्थवत्त्वमुभयथान्यथा हि विरोधः ॥

३० उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ॥

३१ यावदधिकारमवस्थितिराधिकारिकाणाम् ।।

३२ (१३)अनियमः सर्वेषामवि-

---

१ धिकाराच्चेत्यन्तमेकसूत्रं पठित्वा परिशिष्टं पृथक्पठति कश्चित्, सलिलवच्चेति तत्पाठः ॥ २ अन्यथात्वं चेति कश्चित् पठति ।

३ प्राप्तेरिति कश्चित्पठति । ४ मिवेति केचित्पठन्ति ।

रोधः शब्दानुमानाभ्याम्[१] ॥
३३ (१४)अक्षरधियां त्ववरोधः[२] सामान्यतद्भावाभ्यामौपसदवत्तदुक्तम् ॥
३४ इयदामननात् ॥
३५ अन्तरा भूतग्रामवत् स्वात्मनो[३]ऽन्यथा भेदानुपपत्तिरिति चेन्नोपदेशवत्[४] ॥
३६ व्यतिहारो विशिंषन्ति हीतरवत् ॥
३७ सैव हि सत्यादयः ॥
३८ (१६)कामादी[५]तरत्र तत्र चायतनादिभ्यः ॥
३९ आदरादलोपः ॥
४० उपस्थितेऽतस्तद्वचनात् ॥
४१ (१७)तन्निर्धारणा[६]नियमस्तद्दृष्टेः पृथग्घ्यप्रतिबन्धः फलम् ॥
४२ (१८)प्रदानवदेव तदुक्तम् ॥
४३ (१९)लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ॥
४४ (२०)पूर्वविकल्पः प्रकरणात् स्यात् क्रिया मानसवत् ॥
४५ अतिदेशाच्च ॥
४६ विद्यैव तु निर्धारणाद्दर्शनाच्च[७] ॥
४७ श्रुत्यादिबलीयस्त्वाच्च न बाधः ॥
४८ अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम्[८] ॥
४९ न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ॥
५० परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ॥
५१ (२१)एक आत्मनः शरीरे भावात् ॥

---

१ केचित् ३१-३२ सूत्रे व्युत्क्रमं पठन्ति ।
२ त्वविरोध इतिकश्चित्पठति ।
३ स्वात्मन इत्यस्य स्थाने तदुक्तमिति कश्चित्पठति ॥
४ केचिदन्यथेत्यादि पृथक्पठन्तः चेन्नोपदेशान्तरवदिति पठन्ति । कश्चित्तु सूत्रान्तरीकृत्याप्युपदेशवदित्येव पठति ॥
५ कामादि इति कश्चित् पठति ।
६ तन्निर्धारणार्थ इति कश्चित् पठति ।
७ केचिद्दर्शनाच्चेति पृथक्कुर्वन्ति ।
८ कश्चित्प्रज्ञान्तरेत्यादि पृथक्सूत्रं पठति । तन्मते वद्दृष्टिश्चेति पाठः ।

५२ व्यतिरेकस्तद्भावभावि[१]त्वान्न तूपलब्धिवत् ॥

५३ (२२)अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ॥

५४ मन्त्रादिवद्वाऽविरोधः ॥

५५ (२३)भूम्नः क्रतुवज्ज्यायस्त्वं तथा हि दर्शयति ॥

५६ (२४)नाना शब्दादिभेदात् ॥

५७ (२५)विकल्पोऽविशिष्टफलत्वात् ॥

५८ काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ॥

५९ (२६)अङ्गेषु यथाश्रयभावः[२]॥

६० शिष्टेश्च ॥

६१ समाहारात् ॥

६२ गुणसाधारण्यश्रुतेश्च ॥

६३ न वा तत्सहभावाश्रुतेः ॥

६४ दर्शनाच्च ॥

इति तृतीयाध्यायस्य तृतीयः पादः।

—:०:—

१ (१)पुरुषार्थोऽतः शब्दादिति बादरायणः ॥

२ शेषत्वात् पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः ॥

३ आचारदर्शनात् ॥

४ तच्छ्रुतेः ॥

५ समन्वारम्भणात् ॥

६ तद्वतो विधानात् ॥

७ नियमाच्च ॥

८ अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ॥

९ तुल्यन्तु दर्शनम् ॥

१० असार्वत्रिकी ॥

११ विभागः शतवत् ॥

१२ अध्ययनमात्रवतः ॥

१३ नाविशेषात् ॥

१४ स्तुतयेऽनुमतिर्वा ॥

१५ कामकारेण चैके ॥

१६ उपमर्दश्च ॥

१७ ऊर्ध्वरेतःसु च शब्दे हि ॥

१८ परामर्शं जैमिनिरचोदनाच्चापवदति हि ॥

१९ अनुष्ठेयं बादरायणः साम्यश्रुतेः ॥

२० विधिर्वा धारणवत् ॥

२१ (२)स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ॥

---

१ वाभावि इति केचित् पठन्ति । २ भावादिति कश्चित् पठति ॥

२२ भावशब्दाच्च[१] ॥

२३ (३)पारिप्लवार्था इति चेन्न विशेषितत्वात् ॥

२४ तथा चैकवाक्यतोपबन्धात् ॥

२५ (४)अत एव चा[२]ग्नीन्धनाद्यनपेक्षा ॥

२६ (५)सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ॥

२७ (६)शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामप्य[३]वश्यानुष्ठेयत्वात् ॥

२८ (७)सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ॥

२९ अबाधाच्च ॥

३० अपि[४] स्मर्यते ॥

३१ शब्दश्चातोऽकामकारे[५] ॥

३२ (८)विहितत्वाच्चाश्रमकर्मापि ॥

३३ सहकारित्वेन च ॥

३४ सर्वथापि[६] त एवोभयलिङ्गात् ॥

३५ अनभिभवं च दर्शयति ॥

३६ (९)अन्तरा चापि तु तद्दृष्टेः ॥

३७ अपि[७] स्मर्यते ॥

३८ विशेषानुग्रहश्च[८] ॥

३९ अतस्त्वितरज्ज्या[९]यो लिङ्गाच्च ॥

४० (१०)तद्भूतस्य तु नातद्भावो[१०] जैमिनेरपि नियमात्त[११]द्रूपाभावेभ्यः ॥

४१ न चाधिकारिकमपि पतनानुमानात्तदयोगात् ॥

४२ उपपूर्वमपीत्येके[१२] भावमशनवत्तदुक्तम् ॥

४३ बहिस्तूभयथापि स्मृतेराचाराच्च ॥

---

१ इदं सूत्रं कश्चिन्न पठति ।
२ चकारं कश्चिन्न पठति ।
३ अपिकारं केचिन्न पठन्ति ।
४ अपिचेति केचित् पठन्ति ।
५ चारे इति कश्चित् पठति ।
६ सर्वथापि तु इति कश्चित् पठति ।
७ अपिचेति केचित् पठन्ति ।
८ हंचेति कश्चित् पठति ।
९ तरज्या इति कश्चित् पठति ।
१० तु तद्भावो इति कश्चित् पठति ।
११ मात इति केचित् पठन्ति ।
१२ मपित्वेके इति केचित् पठन्ति ।

४४ (११)स्वामिनः फलश्रुतेरित्यात्रेयः ॥

४५ आर्त्विज्यमित्यौडुलोमिस्तस्मै हि परिक्रीयते१ ॥

४६ (१२)सहकार्यन्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ॥

४७ कृत्स्नभावात्तु गृहिणोपसंहारः ॥

४८ मौनवदितरेषामप्युपदेशात् ॥

४९ (१३)अनाविष्कुर्वन्नन्वयात् ॥

५० ऐहिकमप्र२स्तुतप्रतिबन्धे तद्दर्शनात् ॥

५१ एवं मुक्तिफलानियमस्तदवस्थावधृतेस्तदवस्थावधृतेः ॥

इति तृतीयाध्यायस्य चतुर्थपादः॥

—:०:—

अथ चतुर्थोऽध्यायः ।

१ (१)आवृत्तिरसकृदुपदेशात् ॥

२ लिङ्गाच्च ॥

३ (२)आत्मेति तूपगच्छन्ति ग्राहयन्ति च ॥

४ (३)न प्रतीके न हि सः ॥

५ ब्रह्मदृष्टिरुत्कर्षात् ॥

६ (४)आदित्यादिमतयश्चाङ्ग उपपत्तेः ॥

७ (५)आसीनः सम्भवात् ॥

८ ध्यानाच्च ॥

९ अचलत्वञ्चापेक्ष्य ॥

१० स्मरन्ति च ॥

११ यत्रैकाग्रता तत्राविशेषात् ॥

१२ (६)आ प्रयाणात्३ तत्रापि हि दृष्टम् ॥

१३ (७)तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ॥

१४ (८)इतरस्याप्येवमसंश्लेषः पाते तु ॥

१५ (९)अनारब्धकार्ये एव तु पूर्वे तदवधेः ॥

१६ (१०)अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ॥

१७ अतोऽन्यापि ह्येकेषामुभयोः॥

१८ यदेव विद्ययेति हि ॥

१९ (११)भोगेन त्वितरे क्षप-

---

१ केचिदेतत्सूत्रानन्तरं श्रुतश्चेत्येकं सूत्रं पठन्ति ।

२ कमप्यप्र इति केचित् पठन्ति । ३ आप्रायणादिति केचित् पठन्ति।

यित्वाऽथ संपद्यते[१] ॥

इति चतुर्थाध्यायस्य प्रथमः पादः ॥

—:-०-:—

१ (१)वाङ्मनसि दर्शनाच्छब्दाच्च ॥

२ अत एव[२] सर्वाण्यनु ॥

३ (२)तन्मनः प्राण उत्तरात् ॥

४ (३)सोऽध्यक्षे तदुपगमादिभ्यः ॥

५ (४)भूतेषु तच्छ्रुतेः[३] ॥

६ नैकस्मिन् दर्शयतो हि ॥

७ (५)समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ॥

८ तदापीतेः संसारव्यपदेशात् ॥

९ सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ॥

१० नोपमर्देनातः ॥

११ अस्यैव चोपपत्तेरूष्मा[४] ॥

१२ प्रतिषेधादिति चेन्न शारीरात् स्पष्टो ह्येकेषाम्[५] ॥

१३ स्मर्यते च ॥

१४ (६)तानि परे तथा ह्याह ॥

१५ (७)अविभागो वचनात् ॥

१६ (८)तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतः शताधिकया ॥

१७ (९)रश्म्यनुसारी ॥

१८ (१०)निशि नेति चेन्न सम्बन्धस्य[६] यावद्देहभावित्वाद्दर्शयति च ॥

१९ (११)अतश्चायने ऽपि दक्षिणे ॥

२० योगिनः प्रति स्मर्यते[७] स्मार्ते चैते ॥

इति चतुर्थाध्यायस्य द्वितीयपादः ॥

—:०:—

१ (१)अर्चिरादिना तत्प्रथितेः ॥

---

१ क्षपयित्वासंपद्यते इति केचित् क्षपयित्वाथसंपत्स्यत इति कश्चिच्च पठन्ति ॥ २ एवचेति केचित् पठन्ति ।

३ भूतेष्वतःश्रुतेरिति केचित् पठन्ति ॥

४ पत्तेरेषऊष्मा इति केचित् पठन्ति ॥

५ केचित्स्पष्ट इत्यादिकं पृथक्कुर्वन्ति ॥

६ संबन्धादिति कश्चित् पठति यावदित्यादि पृथक्करोति च ॥

७ प्रतिचस्मर्यत इति केचित् पठन्ति ॥

२ (२)वायुम[1]ब्दादविशेषविशेषाभ्याम् ॥

३ (३)तडितोऽधि वरुणः सम्बन्धात् ॥

४ (४)आतिवाहिका[2]स्तल्लिङ्गात् ॥[3]

५ वैद्युतेनैव ततस्तच्छ्रुतेः ॥

६ (५)कार्यं बादरिरस्य गत्युपपत्तेः ।

७ विशेषितत्वाच्च ॥

८ सामीप्यात्तु तद्व्यपदेशः ॥

९ कार्यात्यये तदध्यक्षेण सहातः परमभिधानात् ॥

१० स्मृतेश्च ॥

११ परं जैमिनिर्मुख्यत्वात् ॥

१२ दर्शनाच्च ॥

१३ न च कार्ये प्रत्यभि[4]सन्धिः ॥

१४ अप्रतीकालम्बनान्नयतीति बादरायण उभयथा च[5]दोषात्तत्क्रतुश्च ॥

१५ विशेषञ्च दर्शयति ॥

इति चतुर्थाध्यायस्य तृतीयः पादः ॥

—:०:—

१ (१)सम्पद्या[6]विर्भावः स्वेन[7] शब्दात् ॥

२ मुक्तः प्रतिज्ञानात् ॥

३ आत्मा प्रकरणात् ॥

४ (२)अविभागेन दृष्टत्वात् ॥

५ (३)ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ॥

६ चिति तन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ॥

७ एवमप्युपन्यासात् पूर्वभावादविरोधं बादरायणः ॥

८ (४)सङ्कल्पादेव[8] तच्छ्रुतेः ॥

९ अत एव चानन्याधिपतिः ॥

१० (५)अभावं बादरिराह ह्येवम् ॥

११ भावं जैमिनिर्विकल्पामननात् ॥

---

१ वायुश इति केचित् पठन्ति   २ केचिदेकवचनान्तं पठन्ति ॥

३ एतत्सूत्रानन्तरं उभयव्यामोहात्तत्सिद्धेरित्यप्येकं सूत्रं केचित् पठन्ति ॥

४ प्रतिपत्स्यमीति केचित् पठन्ति ॥   ५ चकारं केचिन्न पठति ॥

६ संपाद्येति केचित् पठन्ति ॥

७ सपंद्याविहायस्वेनेति कश्चित् पठति ॥

८ देव तु इति केचित् पठन्ति ॥

१२ द्वादशाहवदुभयविधं बादरायणोऽतः ॥

१३ तन्वभावे सन्ध्यवदुपपत्तेः ॥

१४ भावे जाग्रद्वत् ॥

१५ प्रदीपवदावेशस्तथा हि दर्शयति ॥

१६ स्वाप्ययसम्पत्त्योरन्यतरापेक्षमाविष्कृतं हि ॥

१७ (६)जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ॥

१८ प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ॥

१९ विकारावर्ति च तथा हि स्थितिमाह[१] ॥

२० दर्शयतश्चैवं[२] प्रत्यक्षानुमाने ॥

२१ भोगमात्रसाम्यलिङ्गाच्च ॥

२२ अनावृत्तिः शब्दादनावृत्तिः शब्दात् ॥

इति चतुर्थाध्यायस्य चतुर्थपादः ।

समाप्तं च वेदान्तदर्शनम् ॥

---

१ तथाहिदर्शयतीति कश्चित् पठति ॥

२ स्थितिमाहदर्शयतश्चैवमिति कश्चित् पठति ॥

सौत्री संख्या शुभाशीः ॥

अध्यायः	पादः	सूत्राणि ।
१	१	३२
१	२	३३
१	३	४४
१	४	२९
२	१	३६
२	२	४२
२	३	५२
२	४	१९
३	१	२७
३	२	४०
३	३	६४
३	४	५१
४	१	१९
४	२	२०
४	३	१५
४	४	२२

अखिलसूत्रसंख्या ५४५

अधिकरणानुक्रमः ।

अधिकृतिगणना चिन्मयी ब्रह्मकाण्डे तादर्थ्येऽनन्तरत्वे
ऽप्यधिकरणभिदा नाल्पसारैः प्रकल्प्या ।

BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS:

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH, M. A., C. I. E.

AND

G. THIBAUT, PH. D.

Nos. 69 70 & 80.

श्री १०८ भगवद्रामानुजाचार्यविनिर्मितो

वेदान्तदीपः ।

बादरायणसूत्राणां संग्रहव्याख्यारूपः ।

श्रीमदाचार्यभट्टनाथस्वामिना संशोधितः ।

VEDÂNTADEEPA,

A GLOSS ON BRAHMASUTRAS,

BY

ŜREE BHAGAVAT RÂMÂNUJÂCHÂRYA.

EDITED BY

ŜREE ÂCHÂRYA BHATTANÂTHASWÂMY.

BENARES.

Published by the Proprietors Messrs. Braj B. Das & Co.,

AND SOLD BY H. D. GUPTA,

Secretary, Chowkhamba Sanskrit Book Depot.

Printed at the Vidya vilas Press,

BENARES.

1904.

निवेदनपत्रिका ।

भगवता बादरायणेन प्रणीतायाः शारीरकमीमांसाया बोधायनटङ्कद्रमिडगुहदेवप्रभृतिभिर्विरचितानां व्याख्यानामविरोधेन प्रतिपन्थिमतनिराकरणसंवलितं श्रीभाष्यं न्यबध्नाद्भगवान् श्री१०८रामानुजाचार्यः । तस्य चातिविस्तृतत्वात्सूत्राधिकरणार्थयोः सुखावगतयेऽमुं च वेदान्तदीपं जग्रन्थ । एष च छात्राणां महोपकारक इत्ययमंशो ग्रन्थावलोकनमात्रेणैव सुज्ञानः सुधीभिः । सोयं ग्रन्थमणिर्दाक्षिणात्ये जनपदे विशिष्टाद्वैतिभिः प्रायः सर्वैरेव श्रीभाष्याध्ययनाधिकारसंपत्तयेऽधीयमानः परितः प्रचलितः । मुद्रितश्चायं त्रैलिङ्गाक्षरेषु नैकवारम् । औत्तराहेषु पुनः प्रबन्धसंकलनपरिश्रमिणो विना न कोऽप्येतस्य वार्तामपि जानाति । का कथा ग्रन्थाध्ययने । एतदेव विमृश्यास्य प्रचारोऽत्र संपादनीय इत्याशयेन मया संशोधकीभूय संमुद्रितो वाराणसेयसंस्कृतपुस्तकावल्याम्* ।

एतत्प्रणेतुश्च श्रीसंप्रदायाभिधानविशिष्टाद्वैतसिद्धान्तागारमूलस्तंभेषु भगवत्सु श्रीमन्नाथमुनियामुनेयपादरामानुजाचार्येषु तृतीयस्यावतारकाल ऊनचत्वारिंशदधिकनवशतसंख्यशालिवाहनशक इति स्फुटमवगम्यते 'धीर्लब्धे'ति(९३९) वाक्येन प्रामाणिकजनोदाह्रियमाणेन ।

---

* यद्यपि वाराणसीस्थराजकीयसंस्कृतपाठशालाध्यापकैः शोध्यत इयं पुस्तकावलीति मुखपृष्ठादवगम्यते । तथापि स नियमोऽधुना त्यक्त इति वदद्भिस्तत्प्रकाशकैरभ्युपगमितोऽस्मि मत्संशोधितपुस्तकस्यात्र प्रकाशने ।

"कल्यब्दे दिव्यकुंभे बुधजनविदिते वत्सरे पिङ्गलाख्ये
चैत्रे मासे गतेषु द्वियुतदशदिनेष्वेधमाने हिमांशौ ।
पंचम्यार्द्रासमेते सुरगुरुदिवसे कर्कटाख्ये च लग्ने
श्रीमान्रामानुजार्यः समजनि निगमान्तार्थसंरक्षणार्थम् ॥"

इति प्राचीनसांप्रदायिकश्लोकोऽप्यत्र प्रमाणम् । तथा च ख्रिस्ताब्दे सप्तदशाधिकसहस्रतमे(१०१७) श्रीभाष्यकारोऽवातरदिति निश्चीयते । यतिवरस्य देहत्यागश्च त्रिसप्तत्युत्तरैकादशशततमे ख्रिस्ताब्द इति शालिवाहनशकबोधकात् 'धर्मो नष्टः' (१०५९) इति वाक्यादवगम्यते ।

भगवद्रामानुजपादप्रणीतग्रन्थाः कतीत्यत्र च
"विष्ण्वर्चाकृतमवनोत्सुको जनानां
श्रीगीताविवरणभाष्यदीपसारान् ।
तद्गद्यत्रयमकृत प्रपन्ननित्या-
नुष्ठानक्रममपि योगिराट् प्रबन्धान् ॥"

इत्यनेन दिव्यसूरिचरितश्लोकेनावगम्यते (१) भगवद्गीताभाष्यम् (२) ब्रह्मसूत्रभाष्यम् (३) वेदान्तदीपः (४) वेदान्तसारः (५) शरणागतिगद्यम्–श्रीरङ्गगद्यम्–श्रीवैकुण्ठगद्यं चेति गद्यत्रयम् (६) भगवदाराधनक्रमश्चेति षडिति । वेदार्थसंग्रहग्रहोऽपि यतीन्द्रप्रणीत एवेत्यन्यत्र प्रकटितं तत्रैव

" इत्युक्त्वा निगमशिखार्थसंग्रहाख्यां
विन्यस्तां कृतिमुररीक्रियार्थमस्य । " इत्यनेन ।

तत्र गद्यत्रयम्–वेदान्तसारम्–भगवदाराधनक्रमं च वर्जयित्वाऽन्ये ग्रन्था मुद्रिता एव । एतेऽपि तैलिङ्गाद्यक्षरेषु मुद्रिता एवेति ज्ञेयम् ।

विस्तरेण च श्रीरामानुजचरितं दिव्यसूरिचरितादिषु निबन्धेषु स्फुटमुपवर्णितं प्राच्यैः ।

किं नु नाम रामानुजीयं मतमिति जिज्ञासा च वेदान्तदीपग्रन्थारम्भावलोकन एव निवर्तत इति तन्मुद्रणेनैव सर्वं सिद्धम् ।

वेदान्तदीपग्रन्थशोधनाधारभूतानि च त्रीणि पुस्तकानि । तत्रैकं मधुरेश(मद्रास)नगरे त्रैलिङ्गाक्षरेषु मुद्रितं वेदान्तसारसहितम् । अन्यच्चास्मत्प्रपितामहपादैः सुगृहीतनामभिः श्रीपरवस्तुवंशावतंसैः श्रीनिवासाचार्यैरार्यवरगुरुभिर्लिखितं त्रैलिङ्गाक्षरमयं तालपत्रात्मकञ्च । अपरं वाराणसीस्थस्यानेकप्राक्तनापूर्वग्रन्थसंपादनधुरीणस्य श्रीमद्गोविन्ददासमहाशयस्य सकाशादधिगतम् ।

एवं पुस्तकत्रयमाधारीकृत्य प्रवर्तितेऽप्यस्मिन् मुद्रणे बहुशो मुद्रालयपुरुषाणामविवेकात्क्वचिच्च ममानवधानादनेके दोषाः समापतिताः । तांश्च द्वितीयमुद्रणावसरे निराकरिष्यामीति नात्र विमनायन्तां सुमनसः ॥

इत्यावेदयिता

आचार्य–भट्टनाथस्वामी ।

सूचीपत्रम् ।

गणपाठः	०	४	०
गोलप्रकाशः	२	८	०
गंगालहरी	०	१	०
गुरुसारणी	०	४	०
जातकतत्त्वम्	०	१२	०
तत्त्वदीप	०	१	०
तर्कसंग्रहः	०	१	६
दत्तकमीमांसा	०	८	०
धर्म्मशास्त्रसंग्रहः	०	१	६
धातुपाठः (शिला -))	०	२	०
धातुरूपावली	०	२	०
नैषध चरित नारायणी टीका टाइप	४	०	०
परिभाषापाठः	०	०	६
पाणिनीयशिक्षा भाष्यसहिता	०	२	०
प्रथम परीक्षा	०	२	०
प्रथमपुस्तक हिन्दी	०	१	०
प्रश्नभूषणम् (प्रश्न विचार का बहुत उत्तम ग्रन्थ)	०	४	०
बीजगणितम् (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	४	०
भट्टीकाव्य ५ सर्ग	०	६	०
मनोरमा शब्दरत्नसहिता (टाइप)	९	०	०
लघुकौमुदी टिप्पणीसहिता	०	४	०
लक्षणावली	०	२	०
लीलावती (म० म० पं० सुधाकरकृतटिप्पणीसहित)	१	०	०
वसिष्ठसिद्धान्तः	०	१	६
वार्तिकपाठः	०	४	०
विष्णुसहस्रनाम	०	१	०
शब्दरूपावली	०	१	६
श्रृङ्गार सप्तशती	१	८	०
समासचक्रम्	०	१	०
समासचन्द्रिका	०	१	०
सरस्वतीकण्ठाभरणम्	३	०	०
साङ्ख्यचन्द्रिका टिप्पणीसहिता	०	८	०
साङ्ख्यतत्त्वकौमुदी	०	६	०
सिद्धान्तकौमुदी	३	०	०
सिद्धान्तमुक्तावली दिनकरीटिप्पणीसहिता	४	०	०
उपसर्गवृत्ति	०	१	०